# परिकल्पना
# मार्गसूची च

## आगामिषु दशसु वर्षेषु संस्कृतस्य विकासाय भाविदृष्टियोजनाः

# विषयसूची

1) प्रस्तावना
2) संस्कृतशिक्षायाः अद्यतनस्थितिः
3) परिकल्पना (Vision)
4) विद्यालयशिक्षायै संस्तुतयः
5) उच्चशिक्षायाः कृते संस्तुतयः
6) विद्यालयस्तरस्य  पारम्परिकशिक्षायाः कृते संस्तुतयः
7) महाविद्यालयस्तरस्य पारम्परिकशिक्षणार्थं संस्तुतयः
8) वेदविद्यायाः कृते संस्तुतयः
9) वेदविद्याविकासार्थं योजनानां संस्तुतिः
10)संस्कृतस्य विकासाय योजनानां संस्तुतिः
11)अष्टादशी संस्कृतस्य  निरन्तरविकासाय अष्टादश परियोजनाः
12)सामान्यसंस्तुतयः

## संस्कृतस्य विकासाय परिकल्पना एवं मार्गसूची (Vision and road map)

### 1) प्रस्तावना

संस्कृतं न केवलेयं भाषा किन्तु भारतस्य आत्मा, मेधाशक्तेः दर्पणः इति काचित् सर्वसम्मता धारणा विद्यते । संस्कृतम् अस्माकम् अतीतवर्तमानयोः सेतुः अस्ति। भारतस्य ज्ञानपरम्परायाः वाहिकेयं भाषा ।

मानवसंसाधनविकासमन्त्रालयः अग्रिमेषु दशसु वर्षेषु संस्कृतविकासाय दीर्घावधिपरिकल्पना एवं मार्गसूची (Vision and road map)इत्यस्य प्रस्तुतये काञ्चित्समितिम् आरचयत् । समित्या विचारितविषयाणां विवरणम् इत्थं विद्यते।

1) संस्कृतस्य विषये वेदविद्यायाः विषये च वर्तमानसन्दर्भे संचालितानां योजनानां मूल्याङ्कनं समीक्षा च।
2) विद्यालयस्य विश्वविद्यालयस्य च शिक्षणस्तरे संस्कृतशिक्षणस्य स्थितेः अध्ययनम्, तत्र गुणात्मकपरिवरर्तनाय अनुशंसा।
3) आगामिषु दशसु वर्षेषु संस्कृतविकासाय परिकल्पनायाः कार्यान्वयनस्य च अनुशंसा ।
4) भौतिकरासायनिकगणितस्वास्थ्यविज्ञानविध्यादिविषयैः सह संस्कृतविषयस्यापि समावेशोपायानाम् अनुशंसा।
5) आधुनिकसाधनैः नूतनप्रौद्योगिकसाधनैः च संस्कृतशिक्षाप्रदानस्योपायानाम् अनुशंसा।

संस्कृतभाषा तद्गतसाहित्यं च मानवजीवनं परितः विद्यमानस्य ज्ञानस्य विशेषकोषः अस्ति । विज्ञानम्, खगोलविद्या, स्थापत्यविद्या, चिकित्साविज्ञानम्, धातुविज्ञानम्, कृषिः, वास्तुविद्या, गणितम्, प्रबन्धनम्, अर्थशास्त्रम्, परिसरविज्ञानम् इत्यादिविषयाः भाषायामस्यां सम्मिलिताः विद्यन्ते। भूतवर्तमानयोः विषययोः समन्वयनाय, प्राचीनसाहित्यज्ञानसम्पदः अवगमनाय, अस्माकं बौद्धिकसम्पदः अधिकारस्य संरक्षणाय, नवाचारस्य नूतनमार्गान्वेषणाय च भारतं ज्ञानाधारिते विश्वे अग्रणीः भवितुम् अधुनातने ज्ञानाधारितसामाजिकपरिदृश्ये संस्कृतस्य अतीव अवश्यकता अस्ति।

तथापि संस्कृते संस्कृतसाहित्ये च निहितस्य ज्ञानभाण्डागारस्य न वा अन्वेषणम्, अथवा तस्य समुचितविधिना व्यवहारे न वा क्रियान्वयनं जातम्।यद्यपि संस्कृतभाषा आलङ्कारिकी लोकप्रिया च अस्ति तथापि न व्यवहारभाषा जाता , न कृता, न वा राज्यस्य केन्द्रस्य प्राशासनिकनीतिषु प्राथम्यं दत्तम्।अमीषां तथ्यानाम् आलोके अस्याः समितेः सदस्यैः आगामिषु दशसु वर्षेषु संस्कृतस्य विकासाय दीर्घावधिपरिकल्पना मार्गसूची इत्यस्य निर्माणे संस्कृतशिक्षासंबद्धसंस्थानां संस्थाजनानां विचाराः सम्मिलिताः स्युः इत्यतः वैयक्तिकरूपेण, पत्राचारमाध्यमेन, अन्तर्जालमाध्यमेन च संस्कृतशिक्षासंबद्धस्य संस्थाभिः जनैश्च सह संपर्कः कृतः । मन्त्रालयेनापि पूर्वसंस्तुतीनां प्रतिवेदनानां च उपलब्धिः समितेः

समक्षं प्रस्तुता। अस्मिन् प्रक्रमे प्राप्तानां सर्वासां संस्तुतीनां गहनविमर्शं कृत्वा केवलं महत्त्वपूर्णान् , कार्यसंपादनयोग्यान् , गुणवत्तासंवर्धकान्, क्षमतासंपादकान्, दीर्घकालिकप्रभावकारिणः उपायान् संस्तुयात् एवं विस्तृतविवरणं क्रियान्वयनसंबद्धसंस्तुतयः च मन्त्रालयस्य कृते प्रथक् प्रत्यर्पणीयाः इति समित्या निर्णयः स्वीकृतः।

सन्दर्भेस्मिन् समितिः इदमपि अभिप्रैति यत् क्रियान्वयनं क्रमबद्धं स्यात्। यद्यपि परिकल्पना दीर्घकालिकभावियोजनानां विवरणम् अस्ति तथापि कार्ययोजनाः संस्तुतयश्च प्रथमचरणे आगामिषु त्रिचतुरेषु वर्षेषु, द्वितीयचरणे सप्तवर्षतः दशवर्षपर्यन्तं स्युः इति।

कस्याश्चिदपि भाषायाः पोषकाय विकासाय च षट् आधारभूताः अंशाः सन्ति तेषु 1) वक्तारः 2) अनुदेशः, शिक्षा, मनोरञ्जनं, प्रशासनम् इत्यादिषु साधनरूपेण प्रयोगः 3) प्रचलितविषयं समकालिकसाहित्यं च अवलम्ब्य ज्ञानात्मकसाहित्यस्य सर्जनम् 4) सन्ततं शब्दसंपदः अभिवृद्धिः 5)प्रौद्यिकस्य समावेशनम् एवं 6) संरक्षणं चेति। अनया दृष्ट्या अमूः संस्तुतयः उल्लिखिताः अंशाः अनतिक्रम्य समित्या प्रस्तुताः अपि च आसां क्रियान्वयनाय अस्मिन् प्रतिवेदने भिन्नभिन्नशीर्षकेषु संस्थापिताः च।

समित्या अयमपि निर्णीतः यत् संस्कृतस्य वर्तमानस्थितिं मनसि निधाय संस्तुतीः साधु अवगन्तुं सन्दर्भसंकेतटिप्पण्या सह प्रस्तोतव्या इति।

अमीषां प्रस्तावानां साफल्यं संस्कृतविदुषाम् इच्छाशक्तौ प्रयासे च निगूहितम् । तेनैव सर्वकारस्य इमां योजनां सफलयितुं शक्नुमः इति समितेः अभिप्रायः। अस्याः योजनायाः सारं समित्या यथा ज्ञातं प्रतिज्ञापितं च तदनुसारं संस्कृतमाध्यमेनेनैव सर्वपक्षान् समाश्रित्य व्यावहारिकरूपेण अर्थपूर्णरुपेण संस्कृतस्य अध्यापनं, संस्कृताध्ययनानुभवः स्मरणीयः दिव्यः च यथा स्यात् तथा करणम्, नूतनप्रवृत्तेः विकासस्य च संस्कृते समावेशः, संस्कृतं सरलं लोकप्रियं च यथा भवेत् तथा करणम् इत्यादिकार्याणि सर्वकारस्य अपेक्षा च संस्कृतविदुषां सहयोगं विना न संभवन्ति। कार्यमिदं सर्वकारोपि पूर्णसहयोगेन अवश्यं करोति, अपि च संस्कृतविद्वांसः अस्य अवसरस्य लाभं स्वीकुर्वन्तः अधिकपरिश्रमेण संस्कृतक्षेत्रे एतादृशं परिवर्तनं कुर्युः तेन संस्कृतविकासाय अधिकं प्रोत्साहनं लभ्येत इति समितिः विश्वसिति।

## 2) संस्कृतशिक्षायाः अद्यतनस्थितिः

भिन्नभिन्नराज्येषु विभिन्नस्तरे संस्कृतं प्रथमकक्षातः द्वादशकक्षां यावत् भिन्नभिन्नाङ्कानां कृते वैकल्पिकविषयरूपेण पाठयन्ति। केरलेषु संस्कृतं प्रथमकक्षातः पाठयन्ति चेत् विद्याभारती, अखिलभारतीयशिक्षासंस्थानेन संबद्धाः 14000 विद्यालयाः द्वितीयकक्षातः संस्कृतम् अध्यापयन्ति। उत्तराखण्डराज्ये तृतीयकक्षातः संस्कृतं पाठयन्ति। बहूनां राज्यानां माध्यमिकशिक्षानिदेशालयः त्रिभाषासूत्रान्तर्गतं षष्ठकक्षातः दशमकक्षापर्यन्तम्, एवम् एकादशकक्षायां द्वादशकक्षायां च वैकल्पिकभाषाविषयरूपेण संस्कृतपाठ्यक्रमं संचालयति। केषुचित् राज्येषु स्वमातृभाषया सह सम्मिश्रितपाठ्यक्रमरूपेणापि पाठनं प्रचलति। आहत्य विद्यालयस्तरे प्रायशः पञ्चकोटिच्छात्राः संस्कृतं पठन्तीति अनुमीयते।

अधुना संपूर्णे देशे विद्यालयस्तरे प्रायशः 5000 पारम्परिकसंस्कृतपाठशालाः, 1000 वेदपाठशालाश्च विद्यन्ते। केवलं अष्टसु राज्येषु संस्कृतमाध्यमिकशिक्षबोर्ड अथवा संस्कृतशिक्षानिदेशालयः विद्यते अवशिष्टेषु राज्येषु काचित् व्यवस्था नास्ति। वेदपाठशालानां कृते न कश्चन निदेशालयः अस्ति । तथापि तासां वेदपाठशालानाम् अधीने त्रिलक्षसंख्याकाः छात्राः संस्कृतम् अधीयते। प्रायः 120 सामान्यविश्वविद्यालयाः स्नातकस्तरे स्नातकोत्तरस्तरे च संस्कृतपाठ्यक्रमं संचालयन्ति। 15 संस्कृतविश्वविद्यालयाः सन्ति । एभिः संस्कृतविश्वविद्यालयैः सह प्रायः 1000 पारम्परिकमहाविद्यालयाः संबद्धाः सन्ति किन्तु एभिः अधिकांशसंस्कृतविश्वविद्यालयैः सह महाविद्यालयान् संबध्नातुम् प्राशासनिकाधिकारः न प्रदत्तः अपि च अनेकेषु राज्येषु पारम्परिकसंस्कृतमहाविद्यालयान् संबध्नातुं नियमानाम् अभावोपि अस्ति। एतादृशव्यवस्थायां प्रायः 10 लक्षच्छात्राः संस्कृतम् अधीयते।

अद्य 10 संस्कृत अकादम्यः, 16 प्राच्यशोधसंस्थानम्, 60 संस्कृतपत्रिकाः , प्रकाशकाः प्रायः 100 समाजिकसंस्थाः च संस्कृतं जनप्रियं कर्तुं प्रयतमानाः सन्ति ।

बहूनि राज्यानि एकादशे द्वादशे च स्तरे कलाविभागस्य छात्रेभ्यः संस्कृतपाठ्यक्रमं संचालयन्ति। द्वित्रीणि राज्यानि वाणिज्यविभागस्य विज्ञानविभागस्य च छात्रेभ्यः संस्कृतपाठ्यक्रमं संचालयन्ति। किन्तु यत्र अस्य उपलब्धिः अस्ति तत्र अध्यापकानाम् अभावकारणात् केवलं नाममात्रं विद्यते। इयं प्रवृत्तिः स्नातकस्तरे स्नातकोत्तरस्तरे च सामान्यतया अनुवर्तते । अनेन कारणेनापि संस्कृतस्य विज्ञानेन प्रौद्योगिकेन च सह संबन्धः विच्छिन्नः अस्ति ।

यद्यपि बहुषु राज्येषु दशमकक्षां यावत् त्रिभाषासूत्रं, एकादशकक्षायां द्वादशकक्षायां च द्विभाषासूत्रं क्रियान्वितं विद्यते किन्तु अधुनापि सीबिएससि, आईसिएससि, एनआईओएस इति त्रयः राष्ट्रियनिदेशालयाः त्रिभाषासूत्रं अष्टमकक्षां यावत् , नवमकक्षायाः दशमकक्षायाः च कृते द्विभाषासूत्रं, एकादशकक्षायाः द्वादशकक्षायाः च कृते एकभाषासूत्रं च अनुपालयन्ति। विचित्रता इयं सर्वकारीयसंस्थाः एव सर्वकारस्य नियमान् नानुपालयन्तीति। अद्यावधि सीबिएससी, केन्द्रीयविद्यालयसंगठनम्, नवोदयविद्यालयः च नवपथप्रदर्शकसंस्थाः इत्यवधारणा अस्ति अतः नैके राज्यनिदेशालयाः अपि सीबिएससी, केन्द्रीयविद्यालयसंगठनस्य, नवोदयविद्यालयस्य च नीतीः(नवोदयविद्यालये संस्कृतं न पाठयन्ति) अनुसरन्ति तेन कारणेन संस्कृतस्य हिन्दीभाषायाश्च स्थाने आङ्ग्लस्य क्षेत्रीयभाषाणां एव पाठनं प्रचलति। केषुचित् स्थानेषु मातृभाषाः अपि आखेटाः संवर्तन्ते।उच्चमाध्यमिकस्तरे संस्कृतस्य अपाठनेन स्नातकस्तरस्य स्नातकोत्तरस्तरस्य च छात्रेषु अस्य प्रभावः संदृश्यते।

इदमपि दृष्टं यत् बहुषु राज्येषु माध्यमिकशिक्षास्तरे संगणकं, पर्यावरणं, विज्ञानं, कृषिः, कौशलम् इत्यादीनां नूतनविषयपाठ्यक्रमाणां परिचयस्य आरम्भः यदा भवति तदा सामन्यतः अन्यविषयापेक्षया वैकल्पिकविषयरूपेण संस्कृतमेव प्रयच्छन्ति । अतः तत्र संस्कृतं बलिपशुः भवति।

ब्रिटीशासनकाले संस्कृताध्यापकानां वेतनम् अन्यविषयाध्यापकानां वेतनस्य अपेक्षया अर्धम् आसीदिति याथार्थ्यम्, अनेन कारणेनापि संस्कृतं बहुकालं यावत् कुभावनया ईक्षितम् । अद्यापि बहुषु राज्येषु माध्यमिकस्तरे उच्चमाध्यमिकस्तरे च संस्कृतम् अध्यापयद्भ्यः शिक्षकेभ्यः प्राथमिकस्तरस्य अध्यापकानां समानवेततनं, स्नातकस्तरे स्नातकोत्तरस्तरे च पाठयद्भ्यः अध्यापकेभ्यः माध्यमिकस्तरस्य उच्चमाध्यमिकस्तरस्य च अध्यापकानां समानवेतनं च दीयमानम् अस्ति।अनेन कारणेनैव एते विद्यालयाः महाविद्यालयाः च उत्तमशिक्षकान् छात्रान् आकर्षयितुं न शक्नुवन्ति।

ब्रिटीश्-शासनात् पूर्वं संस्कृतभाषया संस्कृतग्रन्थैः धर्मनिरपेक्षशिक्षणं प्रददाति स्म। अस्य शिक्षणस्य लक्ष्यं तु ज्ञानप्रदानं चरित्रनिर्माणं च आसीत्(सा विद्या या विमुक्तये)। यदा ब्रिटीशप्रशासकाः प्रशासनार्थम् आङ्ग्लभाषाम् आङ्ग्लशिक्षणपद्धतिं च आरब्धवन्तः तदा उद्योगप्राप्तिः एव अस्य मुख्यं लक्ष्यं जातम्(विपर्यस्तरूपेण इदम् अभवत् सा विद्या या नियुक्तये)| तेन संस्कृतस्य संस्कृतशिक्षणस्य च उपेक्षा ह्रासः च तीव्रः तीव्रतरश्च अभवत्। स्वतन्त्रभारतेपि तासां नीतीनाम् अनुवर्तनेन अद्य संस्कृतविषयस्नातकानां कृते अध्यापकोद्योगस्य अवसरप्राप्तिः अत्यल्पा जाता। अपि च यदि संस्कृतविषयस्य अध्यापकानां निवृत्तिः भवति तर्हि रिक्तपदमपि क्वचिदेव पूर्यते। अनेन कारणेन संस्कृतम् अधीयानाः अल्पीयांसः छात्राः अवशिष्यन्ते तेन उद्योगावसरोपि प्रभावितो भवति । संस्कृतं प्रति इदं दुःश्चक्रं सततं भ्रमति। अतः संस्कृतस्नातकेभ्यः अद्योगावसरस्य सर्जनम् अतीवापेक्षितम् अस्ति।

उच्चशिक्षाध्ययनाय पारम्परिकशाक्षाध्ययनाय च छात्राः विद्यालयशिक्षातः समागच्छन्ति। विद्यालयशिक्षा एव अनयोः स्तरयोः कृते उद्योगं प्रददाति। दौर्भाग्यवशात् विद्यालयशिक्षायां अत्यन्तम् उपेक्षितं क्षेत्रं संस्कृतशिक्षास्ति।

यतः ब्रिटीशप्रशासकाः भारते आङ्ग्लशिक्षणं प्रारब्धवन्तः ततः अद्यावधि संस्कृतशिक्षायाः उद्देश्यं संस्कृतसाहित्यम् अधीत्य तस्य आङ्ग्लभाषायाम् अन्यभारतीयभाषायां वा अनुवादः अस्ति आसीत् च। प्राचीनयुरोपीयभाषाशिक्षणपद्धतिं नाम " व्याकरणानुवादपद्धतिं" संस्कृतभाषायामपि संयोजितवन्तः। पद्धतिरियं समग्रे विश्वे तिरस्कृता किन्तु केवलं संस्कृतशिक्षणे इयं पद्धतिः अद्यापि अनुवर्तते। अस्य परिणामः1) सहस्राधिकानां संस्कृतग्रन्थानाम् अनुवादः जातः तेन संस्कृतं प्रति जनानां जागरूकता संजाता संस्कृतस्य महत्त्वं च ज्ञातं किन्तु 2)जनाः केवलम् अनुवादमेव पठन्ति नतु संस्कृतम् 3) अन्यभाषाणां साहित्यं समृद्धं संजातं न तु संस्कृतम् 4) कणठस्थीकरणस्य, शब्दविभक्तिपरिवर्तनस्य स्मरणस्य, नियमबद्धभाषाशिक्षणस्य च कारणेन संस्कृतभाषाध्ययनम् अत्यन्तं कठिनम् इति धारणा समुत्पन्ना अस्य परिणामस्वरूपम् 5) अधुना देशे अधिकाः संस्कृताध्यापकाः संस्कृतविषयं पठितवन्तः नतु संस्कृतम्।

विद्यालये, महाविद्यालये, पारम्परिकविद्यालयेषु च प्रायः पञ्चलक्षम् अध्यापकाः कार्यं कुर्वन्ति। एतेषु बहवः व्याकरणानुवादपद्धत्या शिक्षिताः अतः संस्कृतं जानन्ति किन्तु संस्कृतेन संभाषणं कर्तुं न पारयन्ति। अपि च संस्कृततः अन्यभाषासु अनुवादं कुर्तुं प्रभवन्ति किन्तु अन्यभाषातः संस्कृते अनुवादं कर्तुं न शक्नुवन्ति। एवं संस्कृतविषयं पाठयन्ति नतु संस्कृतभाषया। संस्कृतविभागाः सन्ति किन्तु तत्र संस्कृतेन परस्पर -संवादः न भवति। संस्कृतविद्यालयेषु महाविद्यालयेषु च संस्कृतं संभाषणभाषारूपेण प्रयुक्तं न भवति । एवं बहुषु संस्कृतविश्वविद्यालयेष्वपि संस्कृतं संवादरूपेण न गुञ्जति। अयम् अन्यो विषयो यत् अद्य कासाशञ्चन सार्वजनिकसंस्थानां, केषाञ्चन सर्वकारेतरसंघटनानां संस्कृताय समर्पिताध्यापकानां प्राध्यापकानां च प्रयासेन संस्कृतं दैनन्दिनक्रियाकलापेषु, कक्षासु, कार्यस्थलेषु च संवदन्ते।

कासाञ्चिदपि भारतीयभाषाणां छात्रस्य कृते संस्कृताभाषाध्ययनं नूतनभाषाध्ययनमिव कष्टं नास्ति यतोहि भारतीयभाषासु 60-70 प्रतिशतं संस्कृतशब्दाः प्रयुज्यन्ते ।प्रायः 20 प्रतिशतं शब्दाः संस्कृतशब्दाः अथवा संस्कृततः उधृताः शब्दाः(तत्समशब्दाः अथवा तद्भवशब्दाः)। अधिकांशभारतीयभाषाणां वाक्यसंरचनापि संस्कृतेन सह सामञ्जस्यं विद्यते। बहूनां भारतीयभाषाणाम् अर्थविन्यासः शैली च संस्कृतेन अधिकं साम्यं विद्यते। पारिवारिककार्यक्रमेषु सामूहिककार्यक्रमेषु च अधीयानाः अपि संस्कृतस्य किञ्चित् परिचयं प्राप्नुवन्ति।

सर्वाः विदेशीयभाषाः तत्तद्भाषया एव पाठ्यन्ते। प्रत्येकं भारतीयभाषापि तत्तद्भाषयैव पाठ्यते। नर्सरीपाठ्यक्रमतः स्नातकोत्तरपाठ्यक्रमपर्यन्तं कस्याः अपि भाषायाः प्रश्नोत्तरं तत्संबद्धभाषयैव लिख्यते न तु अन्यया भाषया । अत्र केवलं संस्कृतमेव अपवादभूतम् अस्ति, अतः संस्कृतह्रासस्य इदमपि मुख्यं कारणमस्ति। संस्कृतशिक्षायाः मुख्यधाराशिक्षायाः च मध्ये महत् अन्तरं महान् विच्छेदश्च अस्ति। अनेन कारणेन एव संस्कृतसंस्थाः अन्तःसंबन्धविषयाध्ययनप्रोत्साहने क्लेशम् अनुभवन्ति।

उपर्युक्तान् सर्वान् बिन्दून् सुविचार्य समितेः अयं दृढिष्ठः अभिप्रायः यत् 1) समितिः केवलं मुख्यसमस्याः तत्परिहारोपायान् अवलम्ब्य स्वमतमुपस्थापयति अवशिष्टानां सूक्ष्मसमस्यानां समाधानं क्रियान्वयसक्षमाधिकार्यधीनम् अस्ति 2)मुख्यतया एतासु समस्यासु अधिकः अक्षिपातः क्रियते यत् क)संस्कृतशिक्षणम् अधिकाकर्षकं प्रासंङ्गिकं पुनरुज्जीवनं च कथं स्यात्। ख)आधुनिकज्ञानसाहित्यैः समकालिकसाहित्यैः च सह संस्कृतम् अधिकं प्रफुल्लम् ऊर्जवत् कर्तुं प्रयत्नो विधेयः येन जीवितभाषारूपेण विस्तृतिं प्राप्नुयात्। ग)संस्कृतच्छात्राणां कृते शोधार्थम् अनुसन्धानार्थं नवनिर्मित्यर्थं च नवावसराः प्राप्येरन्।घ)येन संस्कृतस्नातकानाम् उद्योगाः उद्योगावसराश्च वर्धेरन्।

## 3) परिकल्पना (Vision)

प्राचीनकालात् भारतीयभाषाभिः सह स्वतन्त्ररूपेण विकसितेयं संस्कृतभाषा भारतस्य एकताखण्डतासंपादनाय महत्त्वपूर्णं योगदानं दत्तवती। अस्याः अधिकपोषणस्य अपेक्षा च अस्ति।

भारतस्य प्रत्यनूकं संस्कृतसाहित्यस्य योगदानं विद्यते, अत एव संस्कृतं लोकप्रियं विधाय सदृढं करणीयमस्ति।

संस्कृतस्य विकासः न केवलम् अनिवार्यतया सेत्स्यति अपि तु संविधानस्य अष्टमानुसूच्यां सम्मिलिताभिः भाषाभिः सह प्रतिस्तरं वैकल्पिकविषयरूपेण भवेत्। अनिवार्यता क्वचित् भाषाभिवृद्धये बाधिका स्यात्। अधुना छात्रगणः विकल्पचयने सक्षमः।

संस्कृतं विज्ञान-प्रोद्योगिकी-गणितायुर्विज्ञान-विध्यर्थशास्त्रादीनां भाषया सहैव प्रयोगशालाभाषा अप्यस्ति। किन्त्वधुना देवालयभाषा संजाता। पूजनस्यापेक्षया भाषायां विद्यमानवैशिष्ट्यं जानीयात्। न सांवेगिक्या बुद्ध्या किन्तु विवेकेन विमर्शयेत्। महर्षिः अरविन्दः उवाच –वेदः चिन्तनस्य विषयोस्ति, सर्वधर्मसमन्वयसंस्कृतभाषायां शोधस्य प्रयोगस्य च अपेक्षाविद्यते । उपयोगदृष्ट्या संस्कृतस्य मूल्याङ्कनं कुर्यात्। अर्वाचीनाधुनिकविषयसमन्वयसेतुः पूर्वपश्चिमयोः समस्तोत्तमचिन्तनसमन्वयः च अपेक्षितः ।

पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते मूढः परप्रत्ययनेयबुद्धिः।। (मालविकाग्निमित्रम् 1-2)

(प्राचीनमिति कारणेन सर्वोपि विषयः योग्यो न भवति, अपि च नूत्नः इति कारणेन निन्द्योपि न।विवेकिनः परीक्ष्य योग्यायोग्ययोः निर्धारणं कुर्वन्ति।मूर्खो हि परवचनं विश्वसिति।)

महात्मागान्धीमहोदयः पुत्रेभ्यः लिखितेषु नैकेषु पत्रेषु संस्कृताध्ययनस्य महत्त्वम् उल्लिखितवान्।विना संस्कृताध्ययनं भारतीयशिक्षा अपूर्णा इति अस्य विचारः आसीत्।स्वामी –विवेकानन्दमहोदयोपि विद्वद्भ्यः, जनेभ्यः, स्वशिष्येभ्यः च लिखितेषु पत्रेषु संस्कृताध्ययनस्य महत्त्वम् अवश्यकतां च प्रतिपादितवान्।महात्मागान्धी-स्वामीविवेकानन्दयोः परिकल्पनां फलप्रदां कर्तुं यथाशक्ति प्रयतनीयम्।

श्री नजरुद्दीन अहमदादिमहोदयैः सह डॉ.भीमराव अम्बेडकरमहोदयोपि संस्कृतभाषां राजभाषात्वेन उद्घोषणीयमिति प्रारूपसंशोधनाप्रस्तावे हस्ताक्षरं च अकरोत्।अयं प्रस्तावः संविधानसभायां यदा प्रस्तुतःतदा डॉ.अम्बेडकरमहोदयः पण्डित लक्ष्मीकान्त मैत्रामहोदयश्च संभाषणमुखेन संस्कृतभाषासंभाषणस्य सारल्यं अक्षिसात् अकारयत्। डॉ.अम्बेडकरमहोदयस्य उक्त्यनुसारम् अधुना तादृशकालः संप्राप्तः अस्ति यत् भारतस्य प्रतिच्छात्रं संस्कृतसंभाषणं शिक्षयेत्।

संस्कृतशिक्षणपद्धतौ परिवर्तनस्य अपेक्षा अस्ति।संस्कृतनैव संस्कृतशिक्षणप्रदानाय अध्यापकानां प्रशिक्षणम् अपेक्षितम्।अतःभाषाशिक्षणस्य आधुनिकशिक्षणपद्धत्यनुगुणम् अध्यापकानां प्रशिक्षणम् अध्यापनसामग्रीनिर्माणं च अग्रिमेषु त्रिचतुरेषु वर्षेषु अधिकरूपेण भवेत्। प्रथमचरणे चितेषु विद्यालयेषु प्रतिराज्यम् अग्रणी-परियोजना(Pilot Projects) संचालिता स्यात्।द्वितीये चरणे सर्वेषु विद्यालयेषु षट्सप्तानां वर्षाणाम् अन्तरालं नूत्नायाः पद्धतेः नवीनपाठ्यपुस्तकानां च समावेशो भवितुमर्हति।

समितेः आसां संस्तुतीनां क्रियान्वयनाय सर्वाः संस्कृतसंस्थाः विभिन्नविभागाश्च शैक्षिकक्रियाकलापानां पुनर्निर्धारणम् अग्रिमेषु दशसु वर्षेषु कुर्युः।अपि च षट्सु मासेषु न्यूनातिन्यूनं सकृत् कार्यप्रगतेः अनुवीक्षणा व्यवस्था(Monitoring System) स्यात्।

आगामिषु दशसु वर्षेषु एषां प्रयासानां फलस्वरूपम् इदं भवेत् 1)प्रत्येकं संस्कृतच्छात्रः सरलसंस्कृतसंभाषणे दक्षः स्यात् उत्तरमपि संस्कृते लिखेत्,2)विज्ञानम्, समाजविज्ञानम्,अर्थशास्त्रम्, गणितम् इत्यादीनां संस्कृताधुनिकविषयाणां परस्परं सामैक्यं स्यात्,3) संस्कृते शोधस्य नवीनं मुखम् उद्घाटितं भवेत्,4)संस्कृते मौलिकलेखनरूपेण अनूदितरूपेण वा सर्वेषां विषयाणां ज्ञानप्रधानसाहित्यकोषस्य उपलब्धिः स्यात्,5)संस्कृतं शिक्षायाः अन्येषु आयामेषु यथोचितं सम्मानं विन्देत्।

## 4) विद्यालयशिक्षायै संस्तुतयः

**1)सद्यः स्थितिः**

क) माध्यमिकोच्चमाध्यमिकशिक्षाबोर्ड-अन्तर्गतं माध्यमिकविद्यालयाः त्रिभाषासूत्रस्य, उच्चमाध्यमिकविद्यालयाः द्विभाषासूत्रस्य च क्रियान्वयविषये प्रतिवेदनं मासत्रयाभ्यन्तरे प्रस्तुयुः इति निर्देशं राष्ट्रियशैक्षिकानुसंधानशिक्षणपरिषद् दद्यात् । प्रतिवेदने एतेषां बिन्दूनाम् उल्लेखः अवश्यं भवेत् 1)छात्राणां कृते काः ताः पाठ्यमानाः तिस्रः भाषाः ,2) इमाः कस्याः कक्षायाः आरभ्य कस्याः कक्षायाः पर्यन्तं पाठ्यन्ते , 3)एतदर्थं कति अङ्काः निर्धारिताः, 4)संस्कृतस्य कृते अन्यभाषाणां कृते च सप्ताहे कति कक्षाः निर्धारिताः, 5)उच्चमाधमिकस्तरे कला-वाणिज्यम्-विज्ञानम् इति त्रिषु विषयेषु संस्कृतं पठितुम् छात्रेभ्यः अवसरः दत्तः किम्,।

ख) प्रत्येकं राज्येषु अध्यापकानां नियुक्तौ स्वीकृतपदसंख्याविवरणं सर्वकारीयविद्यालयेषु, सर्वकारसहायताप्राप्तविद्यालयेषु ,सर्वकारेतरविद्यालयेषु च नियुक्तानाम् अध्यापकानां पदसंख्यविवरणं रिक्तपदसंख्याविवरणं च दातुं रा.शै.अ.शि.परिषदः कृते निर्देशं दातुं शक्यते।

ग) सर्वेषु राज्येषु सर्वासु कक्षासु पाठ्यमानानां पाठ्यपुस्तकानाम् अद्यतनस्थितिविषये अ. रा.शै.अ.शि.परिषद् प्रतिवेदनं निर्मीयात् तत्र एते बिन्दवः स्युः – अधुना पाठ्यमानानां पाठ्यपुस्तकानां

निर्मितिः कदा जाता?तेषां पाठ्यपुस्तकानां संशोधनं कतिकृत्वः संजातम्?कदा अन्तिमं संशोधनं जातम् एवं अन्तिमसंशोधनावसरे कानि कानि नूतनाभिकल्पानि संयोजितानि?इति।

घ)संस्कृतेन पाठ्यपुस्तकनिर्माणं, संशोधनं, संस्कृतेन संस्कृतशिक्षणप्रदानमिति श्रमसाध्यकर्मणि समीपस्थस्य संस्कृतविश्वविद्यालयस्य संस्कृतस्नातकोत्तरविभागीयान् संस्कृतेन संस्कृतं पाठयतः अध्यापकान् संयोजनाय रा.शै.अ.शि.परिषदं, राज्य.शि.अ.शि.परिषदं च निवेदयितुं शक्यते।

ङ) रा.शै.अ.शि.परिषद्, राज्य.शि.अ.शि.परिषद् च इदं निश्चिनुयात् यत् निःशुल्कबोधनाय अन्तर्जालमाध्यमेन सर्वेषां संस्कृतपाठ्यपुस्तकानाम् उपलब्धिः स्यात्। अनेन संस्कृतम् अधीयानाः छात्राः इमं आन्तर्जालसौलभ्यं गृह्णानाः पाठ्यक्रमं संस्कृतभाषां च अधिकरचनात्मकरूपेण प्रेरणात्मकवातवरणे अध्येतुम् अवसरं प्राप्नुयुः इति।

च) रा.शै.अ.शि.परिषद् सर्वेषां राज्यानं संस्कृतपाठ्यक्राणाम् अध्ययनं कृत्वा एतेषु प्रयुक्तानां समान्यशब्दानाम् आवल्याः निर्माणं कुर्यात्। विशेषज्ञानां सूचनानुगुणं निर्देशानुसारं च पाठ्यपुस्तकलेखनार्थं संस्कृतस्य सामान्यशब्दावलीसूच्याः निर्धारणं भवेत्। अपि च प्राथमिकस्तरीयाङ्ग्लपाठ्यक्रमसदृशस्य न्यूनशब्दावलीयुक्तस्य न्यूनसंरचनायुक्तस्य सरलमानकसंस्कृतस्य निर्माणं स्यात् येन संस्कृतम् अनुदेशसम्प्रेषणमाध्यमरूपेण प्रयोगे समागच्छेत्।

### 2) 11कक्षायाः 12कक्षायाः च सर्ववर्गाणां कृते संस्कृतविषस्वीकारस्य अवसरः

उच्चमाध्यमिकविद्यालयेषु कलावाणिज्यविज्ञानादिवर्गेषु संस्कृतविषयस्य अध्ययनाय अवसरं कल्पयेत्। विज्ञानवर्गस्य छात्रान् संस्कृतविषयं स्वीकर्तु प्रोत्साहयेत् येन ते छात्राः संस्कृतस्य परिचयं प्राप्नुयात् अपि च अग्रे विधास्यमानेषु शोधकार्येषु अस्य विषयस्य स्वतः समन्वयं कर्तुं अवसरः लभ्येत । अधुना विज्ञानधारायां संस्कृतविषयस्वीकारस्य अवकाशः नास्ति अतः आयुर्वेदमहाविद्यालयेषु संस्कृतविज्ञनोभयाध्येतारः छात्राः न लभ्यन्ते । मानवसंसाधनविकासमन्त्रालयः अस्मिन् विषये सर्वेषां राज्यानां कृते विशेषरूपेण सीबीएसई, आईसिएसई, एनआईओएस,केवएस,एनवि कृते निर्देशं दद्यात्।

### 3) संस्कृतं संस्कृतेन अध्यापनम्

अद्यापि संस्कृतं पाश्चत्यसिद्धान्तपद्धत्याधारभूतया सर्वैः निराकृतया व्याकरणानुवादपद्धत्या पाठयन्ति ।यदा संस्कृतस्य अधिगमस्य उद्देश्यं केवलं संस्कृतसाहित्यस्य विकासः अन्यासु भाषासु अनुवादः च तदैव अस्याः पद्धतेः प्रयोजनम् अस्ति। अद्य सक्रियजीवितभाषरूपेण प्रभावसंप्रेषरूपेण च संस्कृताध्यापनस्य अनिवार्यता विद्यते। प्राचीनसंस्कृतसाहित्यस्य एव परिचयं प्राप्नुयादिति अस्य तात्पर्यं नास्ति किन्तु समकालिकसाहित्यस्यापि निर्माणमपि विद्यते। पाठनपद्धतेः, पाठ्यपुस्तकानां, मुल्याङ्कनप्रणाल्याः परिवर्तनम् अत्यन्तमपेक्षितमस्ति। संस्कृतेन संस्कृतपाठनस्य तात्पर्यमिदं विद्यते यत् समग्राधुनिकपद्धतिं सामग्रिं च स्वीकृत्य नूतनसंस्कृतशिक्षणपद्धत्या भाषाशिक्षणं सरलम् अनुरञ्जकं प्रभावपूर्णं च कुर्यादिति।

ज्ञायते यत् पारम्परिकशिक्षापद्धत्या आधुनिकशिक्षापद्धत्या च शिक्षिताः अत्यल्पकान् संस्कताध्यापकान् विहाय अन्ये व्याकरणानुवादपद्धत्या संस्कृतम् अधीतवन्तः इति, अतः अधिकांशाः अध्यापकाः संस्कृतेन व्यवहारकौशलं न जानन्ति । अतः संस्कृतशिक्षायाः अभिवृद्धौ प्रतीक्षितापेक्षितप्रयासेषु च एते एव कठिनतराः

मार्गावरोधकाः भवन्ति।1920 वर्षम् उप तत्समयस्थया ब्रिटीशशिक्षणपरिषदा व्याकरणानुवादपद्धतेः स्थाने प्रत्यक्षपद्धत्या आङ्ग्लभाषा पाठनीया इति निर्णयः स्वीकृतः तदा तस्य नियमस्याधिकविरोधम् आङ्ग्लाध्यापका एव कृतवन्तः यतोहि ते आङ्ग्लभाषया सुष्ठु संभाषणं कर्तुं न जानन्ति स्म। ततः परिषदा अनुस्यूतं वर्षचतुष्टयं व्याकरणाध्यापकानां कृते पुनश्चर्यापाठ्यक्रमः संचालिता ततःपरं एव प्रत्यक्षपद्धतिः व्यवहारे आगता। इदमपि अभिज्ञातं यत् बहुषु स्थानेषु स्वन्यूनताम् गोपयितुम् अध्यापकैः अयं सरलः प्रवादः प्रदत्तः यत् छात्राः अध्ययनविषये गभीरा न सन्ति केवलम् अधिकाङ्कार्जनाय एव संस्कृतं स्वीकुर्वन्तीति।अतः अध्यापकप्रशिक्षणं मुख्यः विषयः व्यापकरूपेण स्वीकृतिश्च स्यात्।

संस्कृतेन संस्कृताध्यापनस्य क्रमबद्धरूपेण क्रियान्वयनाय अधोलिखिताः उपयाः झटिति स्वीकरणीयाः –

1)अग्रिमेषु त्रिचतुरेषु वर्षेषु माध्यमिकशिक्षाभियानान्तर्गतं सर्वशिक्षाभियानान्तर्गतं च पञ्चलक्षानां संस्कृताध्यापकानां कृते प्रशिक्षणप्रदानाय उत्तमयोजनानिर्माणम् ।

2)छात्राणाम् अध्यापकानां च कृते सेतुपाठ्यक्रमस्य निर्माणम्।

3)सर्वेषां राज्यानां पाठ्यपुस्तकानां पुनःपरिशोधनम्।

4)संस्कृतेन संस्कृतं पाठयितुं छात्राध्यापकयोः सांवेगिककार्यक्रमस्य आयोजनम् ।

5)2016-17वर्षे सर्वेषु राज्येषु कासाञ्चन अग्रणीयोजनानाम् आयोजनम्।

6)संस्कृताध्यापकानां छात्राणां च कृते मुद्रितानाम्, श्रव्यानाम् दृश्यानाम्, आन्तर्जालिकानाम् च साधनानां च अधिकं निर्माणम्।

**4) पाठ्यपुस्तकेषु भारतीयज्ञानप्रणाल्याः समावेशः**

संस्कृते उपलभ्यमानायाः भारतीयज्ञानसम्पदः विद्यालयीयशिक्षायाः सर्वेषु विज्ञानगणितेतिहासादिविषयेषु समावेशः भवेत्। सामग्रीचयनार्थम् परमर्शकानाम् आवलिं निर्मातुं शक्नोति। एनसीईआरटि चितानां सामग्रीणां समावेशः संबद्धविषयेषु कुर्यात् येन शिक्षार्थिनः भारतीयज्ञानसम्पदः परिचयं प्राप्नुयुः स्वविषयं शोधं च गहनरूपेण कर्तुं च प्रभवेयुः। अनेन प्रकारेण कार्यं कर्तुं राज्यनिदेशालयं सूचयितुं शकयते।

**5)सीबीएससी, आईसीएससी,एनआईओएस,केवीएस,नवोदयविद्यालयेषु च त्रिभाषासूत्रं माध्यमिकशिक्षायाः अन्तिमवर्षे एवं द्विभाषासूत्रम् उच्चमाध्यमिकशिक्षापर्यन्तं दृढतया क्रियान्वयनाय निवेदनं कर्तुं शक्यते।**

अधिकांशानां राज्यानां निदेशालयैः दशमकक्षां यावत् त्रिभाषासूत्रस्य, एकादशकक्षायां द्वादशकक्षायां च द्विभाषासूत्रस्य क्रियान्वयनं कृतं किन्तु सीबीएससी, आईसीएससी,एनआईओएस, इति त्रीन् निदेशालयान् विहाय, तेन कारणेन केवीएस,नवोदयविद्यालयेषु अष्टमकक्षां यावत् त्रिभाषासूत्रस्य, नवमदशमकक्षायां द्विभाषासूत्रस्य, एकादशद्वादशकक्षायाम् एकभाषासूत्रस्य क्रियान्वितिः अस्ति। सर्वकाराधीनाः संस्थाः सर्वकारनियमानां क्रियान्वितिं न कुर्वन्तीति उपहासस्य विषयः। अनेन परिणामेन राज्यसर्वकारस्य निदेशालयाः अपि केवलम् आङ्ग्लभाषायाः क्षेत्रीयभाषायाः च अध्यापनं कारयन्तः सन्ति तेन अस्य भारं संस्कृतं हिन्दी च केषुचित् स्थानेषु मातृभाषा अपि वहति। उच्चमाध्यमिकशिक्षायां संस्कृताध्ययनस्य अभावात् स्नातकस्तरे स्नातकोत्तरस्तरे च अस्य दुष्प्रभावः दृश्यते ।अतः माध्यमिकशिक्षायाः अन्तिमवर्षे अर्थात्

दशमकक्षां यावत् त्रिभाषासूत्रस्य, एकादशद्वादशकक्षायां द्विभाषासूत्रस्य नियमम् अवश्यं पालयितुं निदेशालयं निर्दिशेत्।

**6) बीएड डीएड कक्षासु संस्कृतेन संस्कृतप्रविधिः**

एनसिटीई स्वाधिकारिकक्षेत्रे विद्यमानानां शैक्षिकसंस्थानां कृते पाठ्यमानप्रविधिपत्रैः सह संस्कृतप्रविधिमपि पत्ररूपेण समावेशयितुं निर्दिशेत्। अनेन भाविसंस्कृताध्यापकानां कृते स्वाभीष्टक्षेत्रे प्रवेशार्थं सुलभं भवति।

संस्कृतेन डीएड - येषु राज्येषु प्राथमिकस्तरे संस्कृतं पाठ्यते तत्र योग्याननां प्रशिक्षितानाम् अध्यापकानाम् अधिकाभ्यर्थना अस्ति किन्तु एतादृशः डीएडकार्यक्रमः तत्र नोपलभ्यते। अतः मानवसंसाधनविकासमन्त्रालयः एनसिटीई प्रति संस्कृत-डीएडकार्यक्रमस्य संचालनाय मार्गसूचीं निर्मातुं निर्देशं दद्यात् येन सर्वकारीयसंस्थाः सार्वजनिकसंस्थाः च अमुं पाठ्यक्रमं संचालयितुम् अग्रे आगच्छेयुः। अनेन योग्याः संस्कृताध्यापकाःउपलब्धाः स्युः।

**7)संस्कृतमाध्यमेन राष्ट्रियमुक्तविद्यालयसंस्थानस्य(एनआईओएस) पाठ्यक्रमाः**

एनआईओएस माध्यमिशिक्षायाः दृढः आधारः विद्यते। अनेन आङ्ग्ल-उर्दु-हिन्दीभाषासु माध्यमिकशिक्षाकार्यक्रमाः निर्मिताः।यदि एनआईओएस संस्कृतमाध्यमेनापि एतादृशकार्यक्रमाणाम् सर्जनं कुर्यात् तर्हि तत्राधिकावसरस्य उपलब्धेः कारणेन संस्कृताध्येतारः अधिकाः आगच्छेयुः। अनेन पारम्परिकशिक्षणाध्येतॄणां मान्यताप्रश्नोपि परिहृतो भवति यतोहि आदावेव ते छात्राः माध्यमिकशिक्षायां प्रविष्टाः भवन्ति इति कारणेन।पूर्वतः उपलब्धानां सामग्रीणाम् अनुवादः संस्कृते करणीयः, येन अत्यल्पप्रयासेन लक्ष्यं सिध्यति।

## 5)उच्चशिक्षायाः कृते संस्तुतयः

### सामान्यशिक्षा

**1)संस्कृतेन संस्कृतम् –** ब्रिटीशकालतः आङ्ग्लशिक्षा भारते प्रारब्धा ततः व्याकरणानुवादपद्धतेः अनुसरणेन संस्कृतस्य कृते अहितं संजातम् इति कुत्रचित् कस्मिंश्चित् प्रतिवेदने लिखितमिति कारणेन संस्कृतस्य विषये नैकाः विसङ्गतयः उत्पन्नाः। अस्य परिणमः अयं सम्पन्नः संस्कृतभाषापेक्षया छात्राः संस्कृतम् अधिकं पठन्ति अज्ञानात् भ्रमवशात् संस्कृतेन संभाषणं कर्तुं असमर्थाः इति।यदि शिक्षणपद्धतौ परिवर्तनं स्यात् तदा छात्रसंख्यायां न्यूनता भवति इति अधिकाः अध्यापकाः संशिताः सन्तीति अध्ययनेन ज्ञायते। छात्राणां संख्या स्वतः न्यूना जायमाना, तेन संस्कृतविभागोपि पिधीयते अतः न्यूनातिन्यूनं संस्कृतं संस्कृतेन पाठयित्वा संरक्षणं जनप्रियं च कर्तुं शक्यते इति संशोधकानाम् अभिप्रायः।व्याकरणानुवादपद्धतेः समर्थकाः भाषाज्ञानस्यापेक्षया साहित्यानां शास्त्राणां च ज्ञानम् अधिकम् अपेक्षितमिति अभिप्रयन्ति। किन्तु एतेषां सर्वेषां मर्षणा संस्कृतानभिज्ञानां संस्कृतविषयस्वीकृतच्छात्राणां कृते अस्ति। वस्तुनः महत्त्वम् उत सामग्र्याः इति कश्चन प्रच्छति चेत् सामान्यरूपेण द्वयोः इति उत्तरं भवति।किन्तु गतद्विशतकतः वयं सामग्रीं विस्मृतवन्तः अतः वस्तु अपि वेगेन लुप्यमानम् अस्ति।

जनाः इदमपि प्रच्छन्ति यत् आङ्ग्ल-हिन्दी-मराठ्यादिभाषाः स्नातकस्नतकोत्तरकक्षापरीक्षासु तत्तद्भाषयैव लिख्यन्ते किमुत संस्कृतपरीक्षा अन्यभाषया?,यदि अन्यासु भाषासु एकवर्षाभ्यन्तरे

पठनं,लेखनं च शिक्षयन्ति चेत्  किमर्थं संस्कृते नास्ति? अतः संस्कृतशिक्षणपद्धतेः परिवर्तनाय अयं सुसमयः अस्ति।

**समतिरियं संस्तौति यत्  अस्मिन् विषये युजीसि राष्ट्रियस्तरे नियमं निर्धारयेत् एवं 2016-17वर्षतः संस्कृतेन संस्कृतशिक्षणं क्रमबद्धरूपेण  क्रियान्वयनाय सर्वविश्वविद्यालयानां कृते पत्रं लिखेत्। पश्चाष्टवर्षेषु निर्धारितोद्देश्यस्य लक्ष्यप्राप्तिः भवेत् ।एतदर्थं प्रत्येकं विश्वविद्यालयः छात्राणां कृते सेतुपाठ्यक्रमस्य निर्माणाय स्वविश्वविद्यालयस्य संस्कृतप्राध्यापकानां कृते द्विसप्ताहीयकार्यशालाम् आयोजयेत्,तत्र समुचिताध्यापनपद्धतेः चर्चा स्यात्, येन संस्कृतसंभाषणस्य स्वकीयकौशलं विकसितं भवेत्। अयं प्रयासः सरलमानकसंस्कृतस्य समन्वयने अधिकः सहायः भवति। अस्य विवरणं प्रतिवेदने पूर्वमेव उक्तम् अस्ति।**

**2)विज्ञानवाणिज्यविषस्य छात्राणां कृते संस्कृतम् –** स्नातकस्तरे विज्ञानवाणिज्याद्यन्यविषयेश्वपि संस्कृतं वैकल्पिकविषयरूपेण सम्मिलितं भवेत् ।

**3) संस्कृतमाध्ममेन अनुसंधानम् -** एम्.फिल्,एम्.एड्,पीएचडी च संस्कृतमाध्यमेनैव प्रदानं स्यात् शोधप्रबन्धः,लघुशोधप्रबन्धः च संस्कृतेन एव लिखेत् ।

**4)पुनश्चर्यापाठ्यक्रमाः –** संस्कृतभाषादक्षतायाः संप्रेषणक्षमतायाश्च  अभिवृद्धिये संस्कृतस्य पुनश्चर्यापाठ्यक्रमाणामपि पुनःसंशोधनं भवेत् । अधुना तेषां स्वरूपं केवलं  सामग्र्याधारितं विद्यते।

**5)भारतीयज्ञानस्य समावेशः –** संस्कृतसाहित्यं गणितम्,भौतिकम्, रासायनिकं, जीवशास्त्रम्,अभियान्त्रिकम् इत्यादिविषयाणां ज्ञानभाण्डागारः अतः एतेषां विषयाणां  अत्र समावेशः भवेत्।

**6)विश्वविद्यालयेषु स्नातकोत्तरविभागः -** विश्वविद्यालयानां स्नातकोत्तरविभागः एतेषु बिन्दुषु ध्यानं दद्यात् –

1) परिसरे संस्कृतविषये  संध्याकालिकपाठ्यक्रमं  संचाल्य  संस्कृतं जनप्रियं कर्तुं  प्रयतेत।

2)सर्वविभागीयच्छात्राणां कृते  सीबीसीएस- माध्यमेन व्यवहारकौशलस्य वैकल्पिकपाठ्यक्रमाणां च प्रदानं भवेत् ।

3)विश्वविद्यालयानां कार्यक्षेत्रान्तर्गते विद्यालयस्तरे स्नातकमहाविद्यालयस्तरे च संस्कृतपाठ्यचर्यायां, गुणवत्तासम्पादनाय, संस्कृताध्यापकानां कृते प्रशिक्षणप्रदानाय च प्रयासः भवेत् ।

4) स्वीकृतपरियोजनानाम् अन्तर्गतं नवीनज्ञानसर्जनाय आधुनिकसाहित्यस्य अनुवादः भारतवाणीमुखपटले प्रकाशनं च स्यात्।

5)दुर्लभानाम् अप्रकाशितानां  च पाण्डुलिपीनां संपादनाय प्रकाशनाय च परियोजनानां निर्माणं स्वीकारश्च स्यात् ।

6)मैनोस्क्रिप्ट- मिशन- परियोजनायाः अन्तर्गतं पाण्डुलिपीनां युनकोड-अक्षरविन्यासे डाटानिर्माणार्थं ई-सामग्रीनिर्माणार्थं च विदुषां छात्राणां च नियुक्तिः  भवेत्।

7) शोधच्छात्राणां कृते  एम्.फिल्, विद्यावारिधि- कार्यस्य विषयरूपेण पाण्डुलिपिसंपादनस्य कार्यं स्वीकर्तुं प्रोत्साहयेत् ।

8)संस्कृतेन पाठ्यक्रमं निर्माय ‘मूक’ मध्ये  प्रमाणयितुं प्रस्तुतिः।

9) आधुनिककालस्य अपेक्षानुगुणं पाठ्यक्रमे परिवर्तनं संशोधनं च ।

10) सामाजिकेन,आर्थिकेन, राजनीत्या, विज्ञानेन च सम्बन्धितं समकालिकविषयम् आदाय शोधं कर्तुं छात्रान् प्रोत्साहयेत्।

**संस्कृतविश्विद्यालयाः**

1)परिसरेषु संस्कृतवातावरणस्य निर्माणम्।

2)सरलमानकसंस्कृतेन शास्त्राणि – सरलमानकसंस्कृतेन शास्त्राणाम् अध्यापनं भवेत् तेन छात्राः विषयम् सुलभतया अवगच्छेयुः स्वविषये विश्वासयुक्ताः च भवेयुः ।

3)तमिल-विश्वविद्यालयः, उर्दुविश्वविद्यालयः, हिन्दीविश्वविद्यालयः इत्यादिवत् संस्कृतमाध्यमेन इतिहास-सामाजिकविज्ञान-मानविक-गणित-योगादिविषयैः सह विज्ञानवाणिज्यविषयेपि स्नातकस्तरे स्नातकोत्तरस्तरे च पाठ्यक्रमस्य आरम्भः।

4) संस्कृते अपि बीएससि,एमएससि अनुरूपं योग-प्राचीनाधुनिकगणित-अर्थशास्त्र-प्रबन्धन-विध्यादिविषयेषु सामञ्जस्यपाठ्यक्रमाणां प्रारूपनिर्माणम् आरम्भः च।

5)संस्कृतानभिज्ञानां छात्राणां कृते प्रवेशस्तरे संस्कृतसंभाषणसेतुपाठ्यक्रमस्य प्रारम्भः।

6) एम्.फिल्,एम्.एड्,पीएचडी च संस्कृतमाध्यमेनैव प्रदानं स्यात् शोधप्रबन्धः,लघुशोधप्रबन्धः च संस्कृतेन एव लिखेत् ।

7)संस्कृतभाषादक्षतासंपादनाय सम्प्रेषणकौशलविकासाय शास्त्रपाठनपद्धतौ उत्कर्षावाप्तये च संस्कृतपुनश्चर्यापाठ्यक्रमाणां मानकचित्रस्य पुनर्निर्माणम् ।

8)सन्ध्याकालिकपाठ्यक्रमं संचाल्य स्वपरिवेशे संस्कृतस्य शास्त्रस्य च अधिगमः लोकप्रियतासंपादनाय परिश्रमः।

9)सीबीसीएस-अन्तर्गतंगणित-न्याय-समाजकार्य-प्रबन्धन-प्रौद्योगिकव्यवहारकौशलेत्याद्याधुनिक- -- विषयान् वैकल्पिकपाठ्यक्रमरूपेण चेतुम् अवकाशस्य प्रदानम्।

10)ई.एफ.एल.यु(EFLU)कार्यक्रमानुरूपम् आयोज्यमानस्य आयतिकार्यक्रमस्य अन्तर्गतं संचाल्यमानेन कार्यशालामाध्यमेन विद्यालयस्तरे स्नातकमहाविद्यालयस्तरे च संस्कृतपाठ्यचर्यायां, गुणवत्तासम्पादनाय, संस्कृताध्यापकानां कृते प्रशिक्षणप्रदानाय च प्रयासः भवेत्।

11)स्वीकृतपरियोजनानाम् अन्तर्गतं नवीनज्ञानसर्जनाय आधुनिकसाहित्यस्य अनुवादः भारतवाणीमुखपटले प्रकाशनं च स्यात्।

12)दुर्लभानाम् अप्रकाशितानां च पाण्डुलिपीनां संपादनाय प्रकाशनाय च परियोजनानां निर्माणं स्वीकारश्च स्यात् ।

13)मैनोस्क्रिप्ट- मिशन- परियोजनायाः अन्तर्गतं पाण्डुलिपीनां युनकोड-अक्षरविन्यासे डाटानिर्माणार्थं ई-सामग्रीनिर्माणार्थं च विदुषां छात्राणां च नियुक्तिः भवेत्।

14) शोधच्छात्राणां कृते एम्.फिल्, विद्यावारिधि- कार्यस्य विषयरूपेण पाण्डुलिपिसंपादनस्य कार्यं स्वीकर्तुं प्रोत्साहयेत् ।

15)संस्कृतेन पाठ्यक्रमं निर्माय 'मूक' मध्ये प्रमाणयितुं प्रस्तुतिः।

16) आधुनिककालस्य अपेक्षानुगुणं पाठ्यक्रमे परिवर्तनं संशोधनं च ।

17) सामाजिकेन,आर्थिकेन, राजनीत्या, विज्ञानेन च सम्बन्धितं समकालिकविषयम् आदाय शोधं कर्तुं छात्रान् प्रोत्साहयेत्।

18)सरलमानकसंस्कृतेन प्राचीनानां शास्त्रीयानां च ग्रन्थानां पाठ्यक्रमसामग्रीनिर्माणम् ,ई-प्रकाशनं च।

19) मूक- माध्यमेन नैकशास्त्रीयविशयाणां प्रवेशपाठ्यक्रमस्य निर्माणं प्रदानं च।

20) छात्राणां कृते युगपत् अन्यविषयैः सह संस्कृते अपि उपाधिप्राप्तये अवकाशः भवेत्।

21) सम्बन्धितसामग्र्या संस्कृते वैज्ञानिकाध्ययनाय आईआईटी,एनआईटी,समीपस्थाभिः प्रयोगशालाभिः च सह सहभागिता।

22)विदेशीयच्छात्राणां कृते संस्कृतपाठ्यक्रमपरिचयाय विशेषकेन्द्राणां स्थापनम्।

23)संस्कृतम् अध्येतृणां कृते आमुखसौकर्यसहितं (इन्टरफेस फेसलिटि )प्रमाणपत्र/डिप्लोमा/उपाधि-सहितं विनासहितं वा पाठ्यक्रमाणां निर्माणं प्रदानं च स्यात्।

**शोधक्षेत्रम्**

1)अनेकविद्वद्भिः भिन्नभिन्नसंस्थाभिः च समापितानां क्रियमाणानां च शोधपरियोजनानां समग्रपरिचययुक्ता शोधस्य अन्तर्जालीयसूची निर्मिता भवेत्।इदं कार्यं कर्तु तान्त्रिकविश्वविद्यालयेनसंबद्धा काचित् संस्था अधिकृता भवेत्।

2) आधुनिकविषयैः सह शास्त्रविषयसमन्वितस्य अन्तःसम्बन्धिवियषयशोधस्य प्रोत्साहनं भवेत्।

3)सर्वेषु केन्द्रीयविश्वविद्यालयेषु अन्तःसम्बन्धविषयाध्ययनकेन्द्रस्य स्थापना स्यात् यत्र संस्कृतविषयेन भौतिक-रासायनिक-जीवविज्ञान-कृषि-पर्यावरणेत्यादिविषयाणां समावेशः भवेत्।

4)संस्कृतग्रन्थेषु उपलभ्यमाने समसामयिकज्ञानविषये वैज्ञानिकप्रयोगशालानां संस्कृतसंस्थानां च संयुक्ततत्त्वावधाने अध्ययनस्य प्रयासः भवेत्।

5)पर्यावरणाध्ययन-लैङ्गिकाध्ययन-नैतिक-सामाजिकविज्ञान-जीवविज्ञानादिविषयेषु अपि अधिकं लक्ष्यं भवेत्।

6)नवीनशोधपाठ्यक्रमार्थम् अध्येतृवृत्तिप्रदानं, संकायसदस्यानां नियुक्तिश्च भवेत्।

**विश्वविद्यालयानुदानायोगः**

1)संस्कृतेन संस्कृतम् इति लक्ष्यावाप्तये अध्यापनपद्धतौ मूल्याङ्कनप्णाल्यां च परिवर्तनाय विशेषकार्ययोजनायाः निर्मितिं कुर्यात्।

2)विभिन्नराज्येषु संस्कृतविश्वविद्यालयानां स्थापनार्थं मूलभूतसौकर्याभिवृद्धये सकृत् अनुदानं प्रदद्यात् ।

3)यूजीसि, एनएएसी(UGC/NAAC)संस्कृतविश्वविद्यालयानां/संस्थानां कृते मान्यताप्रदानाय अनुदानप्रदानाय च अन्यनियमावल्याः निर्माणं कुर्यात्।

4) सर्वेषु संस्कृतविद्यालयेषु कौशलविकाससम्बन्धिपाठ्यक्रमाणां संचालनाय प्रोत्साहनं, विशेषानुदानस्य प्रदानं च कुर्यात्।

5)संस्कृतस्य शास्त्रीयविषयस्य च पुनःश्चर्यापाठ्यक्रमे अपेक्षितं परिवर्तनं कुर्यात्।

6)संस्कृतेन सह अन्याधुनिकविषयेपि समकालं उपाधिद्वयम् अर्जयितुम् अनुमतिं दद्यात्।

7)संस्कृतविश्वविद्यालयेषु आधुनिकविषयपाठ्यक्रमस्य संचालनाय आधुनिकविषयाध्यापकानां छात्राणां च कृते वेतनं छात्रवृत्तिं च प्रदातुं विशेषानुदानं प्रदद्यात्।

8)स्नातकस्तरे स्नातकोत्तरस्तरे च भारतीयज्ञानप्रणालिम् अवलम्ब्य ऐच्छिकपत्राणां वैकल्पिकपत्राणाम् आरम्भं कुर्यात्।

9)स्नातकस्तरे स्नातकोत्तरस्तरे च दर्शनम्,इतिहासः वास्तुशास्त्रम् इत्यादिविशेषविषयेषु संस्कृतेन सुष्ठुज्ञानसंपादनाय बलं नियच्छेत्।

10)संस्कृतसंस्थानां विदुषां कृते पराविद्यावारिध्येतृवृत्तिप्रदानाय विशेषानुदानं दद्यात्।

11)2001वर्षे विश्वविद्यालयानुदानायोगेन स्वीकृतस्य निर्णयानुसारं सामान्यविश्वविद्यालयेषु महाविद्यालयेषु च सरलसंस्कृतसंभाषणकेन्द्राणां स्थापनार्थं विशेषानुदानं दद्यात्।

12) उपर्युक्तेषु सामन्यशिक्षा,संस्कृतविश्वविद्यालयः, शोधक्षेत्रम् इति शीर्षकेषु प्रस्तुतानां संस्तुतीनां क्रियान्वयनाय सहायं कुर्यात्।

13)उल्लिखितानां सर्वासां संस्तुतीनां प्रभावरूपेण क्रियान्वयनाय विशेषसमितेः आरचनं कुर्यात्।

**एआईसीटीई(AICTE)**

1)क्रेडिट- अर्जनाय संस्कृते ऐच्छिकपाठ्यक्रमाणां प्रदानं भवेत्।

2)तान्त्रिकसंस्थासु शोधार्थम् अध्यापनार्थं च संस्कृतविदुषां कृते अध्येतृवृत्तेः अध्यापकपदस्य सर्जनं च भवेत्।

3) संस्थासु आधुनिकविषयेषु भारतीयज्ञानपरम्परायाः अपि समावेशः भवेत्।

4)संस्कृतविश्वविद्यालयानां सर्वाकारेतरसंस्कृतसंस्थानां च संयुक्ततत्त्वावधाने शोधपरियोजनाः भवेयुः।

5)शास्त्रविषये विज्ञानविषये च कार्यशालानां संगोष्ठीनां च आयोजनं भवेत्।

**आईसीपीआर,आईसीएचआर,आईसीएसएसआर(ICPR,ICHR,ICSSR)**

मानवसंसाधनविकासमन्त्रालयस्य अधीने विद्यमानासु आसु परिषत्सु न केवलं पूर्णकालिकः प्रकोष्ठः किन्तु पाश्चात्त्यसिद्धान्ते ज्ञानपरम्परायां च निष्णातैः विद्वद्भिः सह शोधादिविषये प्रभावपूर्णेन विचारविमर्शनाय अवकाशोपि अपेक्षितः ।

**राष्ट्रियपुस्तकन्यासः (National Book Trust)**

समग्रे देशे अनेकसर्वकारेतरसंघटनानां संस्कृताध्यापकानां सततपरिश्रमेण लक्षाधिकाः छात्राः आबालवृद्धं जनाः दैनन्दिनजीवने संस्कृतेन व्यवहरन्ति । सहस्राधिकबालानां मातृभाषा संस्कृतं संजातमस्ति। एतेषां कृते आधुनिकविषयाः अद्यतनसमाजसंबन्धिसामग्र्यः च संस्कृतेन अपेक्षिताः

अतः राष्ट्रियपुस्तकन्यासः (National Book Trust)संस्कृते अपि पुस्तकानि प्रकाशयितुं शक्नोति।

**इग्नू अन्ये मुक्तविद्यालयाश्च**

इग्नू अन्ये मुक्तविश्वविद्यालयाश्च स्वकार्यक्रमान्तर्गतं संस्कृतभाषाशिक्षणे क्रमबद्धपाठ्यक्रमं निर्माय अन्तर्जालमाध्यमेनापि छात्रेभ्यः प्रदातुं शक्नुयुः। अस्मिन् विषये मानवसंसाधनविकासमन्त्रालयः विश्वविद्यालयानुदानायोगः च सर्वेषां राज्यानां मुक्तविश्वविद्यालयेषु स्नतकस्तरे स्नातकोत्तरस्तरे च सीबीसीएस- अन्तर्गतं संस्कृते आवश्यकताधारितपाठ्यक्रमस्य संचालनाय आदेशपत्रमुखेन सूचयितुं शक्नोति।

**आआटी,(IITs)एन्नआईटी(NITs),आईआईएसईआर(IISERs),आईआईएससि(IISC),केन्द्रीयविश्वविद्यालयाः, एआईसीटीई(AICTE) अनुमोदिताः तान्त्रिकमहाविद्यालयाः**

आआटी,(IITs)एन्नआईटी(NITs),आईआईएसईआर(IISERs),आईआईएससि(IISC),केन्द्रीयविश्वविद्यालयेषु, एआईसीटीई(AICTE)अनुमोदितेषु तान्त्रिकमहाविद्यालयेषु च संस्कृतप्रकोष्ठस्य स्थापना भवेत् येन संस्कृतसाहित्ये विद्यामानस्य तान्त्रिकविषयस्य वैज्ञानिकविषयस्य अन्यान्तःसम्बन्धविषयस्य तत्समानविषस्य च अध्ययनं स्यात् ।अथर्ववेदः, वैशेषिकदर्शनम् इत्यादयः वैज्ञानिकविषयाणां भाण्डागाररूपेण प्रख्यातं विद्यते एवं अद्य यावत् वैज्ञानिकदृष्ट्या अध्ययनं प्रचलति।संस्कृतस्य सिद्धान्तशिरोमणिः,वृक्षायुर्वेदः,उपवनविनोदः, मायामन्त्रः इत्यादिनैके ग्रन्थाः शोधस्य नवाचारस्य च सन्दर्भे महत्त्वं भजन्ते। प्रस्तावितसंस्कृस्तप्रकोष्ठस्य माध्यमेन परिसरेषु नैकसंस्कृतपाठ्यक्रमान् छात्राणां कृते संचालयितुं शक्नुयात्।

## 6)विद्यालयस्तरस्य पारम्परिकशिक्षायाः कृते संस्तुतयः

1) **संस्कृतमाध्यमेन संस्कृतम्**

संस्कृतविद्यालयेषु संस्कृतं साधनं साध्यं च, शिक्षणम् उपकरणरूपेण साधनम्,परिणामरूपेण साध्यं च विद्यते। सर्वैः अङ्गीक्रियते यत् कस्यामपि भाषायां प्रावीण्यसंपादनाय तया भाषयैव अध्ययनम् अवश्यं करणीयं यतोहि भाषाज्ञानम् एकं कौशलम् अस्ति । पारम्परिकशिक्षणप्रणाल्यां तु इदम् अवश्यमेव, यतः संस्कृते प्रावीण्यसंपादनाय संस्कृतमाध्यमेनैव संस्कृतस्य अध्यापनम् अपरिहार्यं यतोहि उच्चाध्ययनेषु छात्राणां कृते शास्त्राध्यापनं केवलं टीकामाध्यमेनैव भवति। एतदर्थं संस्कृताध्यापकानां छात्राणां च मनःपरिवर्तनम् अपेक्षितमस्ति। संस्कृतविद्यालयेषु औपचारिकरूपेण अनौपचारिकरूपेण च संस्कृतं भवेदेव। पारम्परिकविद्यालयेषु प्रत्येकं छात्रः सरलशुद्धसंस्कृते परिपक्वः भवेत्। संस्कृतभाषायाः विषये प्रत्येकं संस्कृताध्यापकः ध्वनिवर्धकः भवेत्। प्रत्येकं संस्कृतविद्यालयः संस्कृतसंभाषणेन गुञ्जेत् ।

2) **अध्यापकप्रशिक्षणम् –** 1) व्यवहारसंस्कृते सकृत् विशेषप्रशिक्षणम् 2) सेवारतनाम् अध्यापकानां कृते नियमितप्रशिक्षणकेन्द्रम्।

संस्कृतं छात्रकक्षासु अध्यापककक्षासु च व्यवहारभाषरूपेण परिवर्त्य संस्कृताध्यापकानाम् आत्मविश्वासं वर्धयेत् । उत्तमभाषाध्यापकाः भवितुं कौशलयुक्ताः सामग्रीसम्पन्नाः च स्युः। एतदर्थं माध्यमिकशिक्षाभियानान्तर्गतं सुविचारितविशेषप्रशिक्षणकार्यक्रममाध्यमेन संस्कृताध्यापकेभ्यः संस्कृतेन संभाषणकौशलम्, भाषाशिक्षणकौशलं च प्रदेयं भवति। अपि च प्रत्येकं जनपदे (जिला)सेवारतानाम् अध्यापकानां कृते अपेक्षितसौलभ्यसहितं प्रशिक्षणकेन्द्रं भवेत्।मानवसंससाधनविकासमन्त्रालयः डीआईईटीमाध्यमेन सर्वकारेण चिह्नितया प्रायोजितसंस्थया वा सर्वेषु जनपदेषु(जिला) एतादृशं प्रशिक्षणकेन्द्रं संस्थापयेत्।

3) **पाठ्यचर्यायां संशोधनम्, भाषकौशलस्य महत्त्वम्,सम्प्रेषणम्, विशेषतया संस्कृतेन अधिकलेखनम्**

संस्कृताध्ययनम् आकर्षकं छात्रसुगमं च कर्तुं क्रियान्वितेषु इदं महत्त्वपूर्णं कार्यं विद्यते।

4) **संस्कृतस्य छात्राणाम् अध्यापकानां च कृते अनिवार्यरूपेण संगणकशिक्षा एतदर्थं क्रमबद्धपाठ्यक्रमनिर्माणम्**

आधुनिकस्पर्धात्मके काले अधिगमावश्यकतायाः आपूर्त्यर्थं सर्वेषां संस्कृताध्यापकानां छात्राणां च कृते संगणकस्य परिचयः अनुप्रयोगः च अनिवार्यरूपेण प्रदेयः अस्ति।यद्यपि बहुषु संस्कृत- -विश्वविद्यालयेषु पाठ्यचर्यायाः भागः विद्यते किन्तु अपेक्षितानुसारं क्रियान्वयनं न जातं, न वा संस्कृतविद्यालयेषु महाविद्यालयेषु च प्रसारितम् ।अतः क्रमबद्धरूपेण पाठ्यक्रमं योजनां च निर्माय क्रियन्वितं कुर्यात्।

5) **पूर्वोक्तेषु चतुर्षु विषयेषु राज्यशिक्षानिदेशालयानां कृते निर्देशः**

उपर्युक्ताः चत्वारः क्रियात्मकविचारः तदैव सफालतारूपेण क्रियन्वितं भवति यदा मानवसंसाधनविकासमन्त्रालयः, राज्याधीनस्थाः प्रधिकाराः च स्वयं समाविष्टाः स्युः। मानवसंसाधनविकासमन्त्रालयः अस्मिन् विषये स्वाधीनस्थाभ्यः संस्कृतसंस्थाभ्यः राज्येभ्यश्च निर्देशं प्रदातुं शक्नोति।

6) **परीक्षाणाम् आयोजनार्थं,पाठशालानां कृते मान्यताप्रदानार्थम्, अनुदानप्रदानार्थं च केन्द्रीयमाध्यमिकशिक्षानिदेशालयः**

संपूर्णे देशे नैकाः संस्कृतपाठशालाः सन्ति । तासां पारम्परिकशिक्षायाः कदापि सम्यक् मान्यता न प्राप्ता, न वा तासां मान्यताविषये जागरूकाः।अस्य पारम्परिकाध्ययनस्य संरक्षणम्, आधिकारिकी मान्यता च अत्यन्तम् आवश्यकमस्ति। एतदर्थं समितिः दृढतया संस्तौति यत् मानवसंसाधनविकासमन्त्रालयः केन्द्रीयवेदसंस्कृतमाध्यमिकनिदेशालयं स्थापयेत्, सः निदेशालयः मान्यताप्रदानं, परीक्षाणाम् आयोजनम्, अनुदानप्रदानम्, इत्यादि कार्याणि कुर्यात्। अयं निदेशालयः स्वायत्तासंस्थारूपेण मानवसंसाधनविकासमन्त्रालयस्य अधीने आधिकारिकरूपेण स्थापितो भवेत्।

7) **प्रतिराज्यम् आधुनिकशिक्षायाः तुल्यं परम्परागतशिक्षया संस्कृतमाध्यमेन आदर्शसंस्कृतमाध्यमशालाः**

भारते ब्रिटाशप्रशासकैः प्रारब्धयाः आङ्ग्लशिक्षणप्रणाल्याः परिचयात् प्राक् ज्ञानशाखायाः प्रसारस्य माध्यमं सार्वजनिकविषयं च संस्कृतम् आसीत् । एकशताब्दतः पूर्वम् ओरियण्टल विद्यालयः इति नामिका विद्यालयप्रणाली आसीत् यतो हि अद्य यावत् केषुचित् राज्येषु पञ्चविषययुक्तायाम् आधुनिकधाराशिक्षाप्रणाल्यां संस्कृतविषयत्रयं अन्तर्विषयत्वेन पाठनं प्रचलति । अनेन प्रकारेण इयं शिक्षणप्रणाली प्राचीनार्वचीनयोः पूर्वपश्चिमशिक्षयोः च सम्मिलितरूपेण संरक्षितास्ति।

समितिरियं संस्तौति यत् प्रतिराज्यम् आदर्शविद्यालयस्य स्थापना भवेत् यत्र प्राथमिकशिक्षायां, माध्यमिकशिक्षायां च वर्तमानसमये पाठ्यमानैः आधुनिकविषयैः सह संस्कृतस्यापि विषयस्य समन्वयः, संस्कृतमाध्यमेन पाठनं च भवेत् इति। इयं योजना अधोलिखितकारणानुगुणम् अत्यन्तमपेक्षिता अस्ति –

1)भाषारूपेण संस्कृतस्य विकासाय

2)संस्कृतच्छात्राणां कृते उद्योगावसरस्य अभिवृद्धये

3)संस्कृतं मुख्यधारया सह समन्वयनाय च । एतत् कार्यम् पर्याप्तधनराशियुक्तस्य निदेशालयस्य कृते प्रदातुं शक्यते।

**8) आधुनिकशिक्षाशिक्षकानां समानवेतनं संस्कृतशिक्षकाणां कृते प्रदातुं राज्येभ्यः निर्देशनम्**

बहुषु राज्येषु आधुनिकधारायां समानस्तरे विद्यमानानाम् अन्यविषयाध्यापकानां भाषाध्यापकानां वा यावद्वेतनं, तत्समानवेतनं परम्परागतक्षेत्रस्य संस्कृतशिक्षकाणां कृते न प्रदीयते। मानवसंसाधनविकासमन्त्रालयः संस्कृतविद्यालयेषु महाविद्यालयेषु च तत्समानयोग्यतायुक्तानां शिक्षकाणां कृते स्तरानुगुणं योग्यातानुगुणं आधुनिकशिक्षाध्यापकानां यावद्वेतनं तत्समानवेतनं दातुं राज्येभ्यः निर्देशं दद्यात्।

**9)पाठशालासु संस्कृते नूतनविषयाभिविन्यासस्य सामग्र्याः निर्माणार्थं च प्रतिराज्यम् एकस्याः संस्थायाः निश्चयः**

शिक्षणं सर्वदा परिवर्तनशीलं भवति। कदापि काञ्चित् पद्धतिं समाग्रीं वा सर्वदा आश्रयितुं न शक्यते। शिक्षणं मनोरञ्जनम् आकर्षकं च भवितुम् अध्ययनशिक्षणसामग्रीणाम् अधिकापेक्षा विद्यते। अन्येषु विषयेषु अन्यासु भाषासु च अध्ययनसामग्रीनिर्माणे निरन्तरप्रायसरताः भवन्ति। केषुचित् विश्वविद्यालयेषु सामग्रीनिर्माणार्थं विभागः एव अस्ति, स च विभागः एतदर्थं सर्वदा समर्पितः च ।प्रतिराज्यं एतत्कार्यसंपादनाय काचित् संस्था निश्चिता स्यात्। इयं संस्था पारम्परिकपाठशाला, विश्वविद्यालयः,सर्वकारेतरसंस्था वा भवितुमर्हति।

**10) आधुनिकपद्धत्या आधुनिकदृष्ट्या च संस्कृताध्यापकानां कृते भाषाशिक्षणप्रशिक्षणाय अखिलभारतीयकेन्द्रम्-**

शैक्षणिकदृष्ट्या भाषाशिक्षणे अनेकपरिवर्तनानि संजातानि। संस्कृताध्यापकाः एतत् परिवर्तनं नाङ्गीकुर्वन्ति अथवा अनभिज्ञाः सन्ति। अपि च सर्वैः अनादृतां एकामेव पद्धतिम् अनुसरन्ति। अतः केन्द्रीयविश्वविद्यालयाधीनम् अथवा अधिकृतसंस्थाधीनं कश्चित् राष्ट्रियसंस्कृतप्रशिक्षणकेन्द्रं स्थापितं भवेत्।

## 7)महाविद्यालयस्तरस्य पारम्परिकशिक्षणार्थं संस्तुतयः

1) **संस्कृतमाध्यमेन संस्कृतशिक्षणम्**

   अद्य महाविद्यालयस्य छात्राः उच्चस्तरीयशास्त्रपाठ्यक्रमम् अवगन्तुं न शक्नुवन्ति यतोहि तेषु संस्कृतभाषाज्ञानस्य अभावः अस्ति। अतः संस्कृतमाध्यमेन संस्कृतमेव संस्कृतशिक्षणं फलेग्रहि कर्तुं शक्नोति ।अनुवादमाध्यमेन भाषाशिक्षणं छात्राणां बुद्धिं न विकासयति । संस्कृतभाषाप्रावीण्यं छात्रे आत्मविश्वासं जागरयति एवं सः विषमपरिस्थितिं सम्मुखीकर्तु च समर्थो भवति। संस्कृते अन्तर्निहितज्ञानम् अवगन्तुं संस्कृतमेव तं समर्थं करोति । अतः शास्त्राणां संरक्षणं प्रचारं संस्कृतसीमायाः विस्तारं च कर्तुं संस्कृतं संस्कृतमाध्यमेन अध्यापनम् अनिवार्यम् अस्ति।

2) **शिक्षकप्रशिक्षणम्**

   **क) अध्यापनसंभाषणविषये विशेषप्रशिक्षणम्**

   **ख) सेवारतानां कृते प्रशिक्षणाय स्थायि केन्द्रम्**

पारम्परिकविद्यालयेषु महाविद्यालयेषु च कार्यरतानाम् अध्यापकानां कृते संस्कृतसंभाषणकौशलस्य भाषाशिक्षणकौशलस्य च विकासाय सकृत् प्रशिक्षणकार्यक्रमः आयोजितः स्यात् । एतदर्थं स्थायिप्रशिक्षणकेन्द्रम् उपयुक्तसंसाधनैः सह कस्मिंश्चित् विश्वविद्यालयस्य अधीने विश्वविद्यालयानुदानायोगेन, मानवसंसाधनविकासमन्त्रालयेन वा स्थापितं भवेत्।

3) **पाठ्यक्रमसंशोधनम्, भाषाकौशल्यस्य महत्त्वम्, संप्रेषणम्, संस्कृतेन आधिकाधिकलेखनं च**

एतानि सर्वाणि उच्चस्तरीयशिक्षणसंस्थानां कृते अधिकमपेक्षितमस्ति। पाठ्यक्रमसंमीक्षणाय, भाषाकौशलविकासाय, भाषासंप्रेषणाय च अनवरतं प्रयासः भवेत् । अपि च संस्कृते समकालिकविषलेखनस्य कृते अधिकः प्रोत्साहः भवेत् । विश्वविद्यालयानुदानायोगः, मानवसंसाधनविकासमन्त्रालयः च अस्मिन् विषये संस्कृतविश्वविद्यालयानां संबद्धसंस्थानां च कृते निर्देशं दातुं शक्नोति ।

4) **सर्वेषां संस्कृतच्छात्राणां संस्कृताध्यापकानं च कृते अनिवार्यरूपेण संगणकप्रशिक्षणम्**

संगणकस्य प्रारम्भिकज्ञानं, यान्त्रिकबुद्धिमत्ता, प्राकृतिकभाषाप्रक्रिया(NLP) इति एते सर्वेपि विषयाः उच्चस्तरीयशैक्षिकसंस्थानां संगणकपाठ्यक्रमे अनिवार्यरूपेण भवेयुः।

5) **आधुनिकपद्धत्या आधुनिकदृष्ट्या च संस्कृताध्यापकानां कृते भाषाशिक्षणप्रशिक्षणाय अखिलभारतीयकेन्द्रम्-**

विश्वविद्यालयानुदानायोगः, मानवसंसाधनविकासमन्त्रालयः वा सेवारतानाम् संस्कृताध्यापकानां कृते अल्पावधिप्रशिक्षणकार्यक्रमसंचालनाय राष्ट्रियसंस्कृताध्यापकप्रशिक्षणकेन्द्रं स्थापयितुं शक्नोति।

6) **सर्वेभ्यः राज्येभ्यः आधुनिकशिक्षाध्यापकानां यावत् वेतनं तावत् वेतनं प्रदातुं निर्देशः**

पारम्परिकसंस्कृविद्यालयेषु यथा तथैव पारम्परिकमहाविद्यालयेष्वपि वेतनस्य तारतम्यम् अभिलक्ष्यते। स्नातकस्तराध्यापकानां कृते उच्चमाध्यमिकस्तरस्य वेतनं प्रदीयते, स्नातकोत्तरस्तरे स्नातकस्तरस्य वेतनं प्रदीयते। सर्वकारः सर्वेभ्यः राज्येभ्यः समानकार्यं समानवेतनम् इत्यस्य क्रियन्वयनाय निर्देशं दद्यात्। समानवेतनप्राप्तये अपक्षितयोग्यतासंपादनाय अध्यापकानां कृते अवसरः प्रदीयेत।

7) **संस्कृतमाध्यमेन आधुनिकविषयाणां परिचयः, नूतनपाठ्यक्रमाणां संचालनं च**

संस्कृतं लोकप्रियं स्वीकार्ययोग्यं च कर्तुं संस्कृतमाध्यमेन आधुनिकविषयाणां पाठ्यक्रमसंचालनं अधिकम् अपेक्षितं विद्यते ।पारम्परिकसंस्थाः इतिहासः, मनोविज्ञानम्, अर्थशास्त्रम्, इत्यादिविषयेषु संस्कृतमाध्यमेन पाठ्यक्रमं संचालयेत्। येन संस्कृतं सहजसंप्रेषणभाषया सह संस्कृतच्छात्राणां कृते उद्योगावसरमपि वर्धयेत् ।

8) **मदनमोहनमालवीय-अध्यापकशिक्षण- मिशन् इत्यस्य अन्तर्गतं संस्कृतस्य कृते द्वयोः विशेषकेन्द्रयोः स्थापना**

एमएमएमएमटीटी इति योजनायाः अन्तर्गतं स्थापयितुम् उद्दिष्टेषु केन्द्रेषु न्यूनातिन्यूनं केन्द्रद्वयं संस्कृतप्रशिक्षणाय प्रदातुं मानवसंसाधनविकासमन्त्रालयः निर्देशं दातुं शक्नोति।संस्कृताध्यपकानाम् अध्यापनकौशलस्य विकासाय अत्यन्तम् उपकारकं भवति।

9) **येषु राज्येषु संस्कृतविश्वविद्यालयाः न सन्ति अथवा मान्यताप्रदानाय व्यवस्था नास्ति तत्र संस्कृतमहाविद्यालयानां मान्यताप्रदानाय विशेषव्यवस्था**

संस्कृतमहाविद्यालयाः अधुना मान्यताविषये महतीं समस्याम् अनुभवन्ति । येषु राज्येषु संस्कृतविश्वविद्यालयाः सन्ति तत्र ईदृशी समस्या नास्ति। किन्तु बहुषु राज्येषु संस्कृतविश्वविद्यालयाः न सन्ति। तेषु राज्येषु संस्कृतमहाविद्यालयाः मान्यतास्वीकारः, पाठ्यक्रमाणां संशोधनं,परीक्षा इत्यादिविषयेषु समस्याम् अनुभवन्ति। अतः संस्कृतमहाविद्यालयानां कृते मान्यताप्रदानाय केन्द्रीयमानितविश्विद्यालयानां कृते अथवा समीपस्थविश्वविद्यालयानां कृते विशेषाधिकारं प्रदातुं शक्यते।

10) **पारम्परिकक्षेत्रे संस्कृतशिक्षणस्य प्रगतेः निरीक्षणाय वार्षिकप्रोन्नतेः अनुवीक्षणाय च अखिलभारतीयस्तरे प्रकोष्ठस्य स्थापनम्**

मानवसंसाधनविकासमन्त्रालयः पारम्परिकसंस्थानां कृते राष्ट्रियप्रोन्नतिमूल्याङ्कनप्रकोष्ठस्य स्थापनां नियोजनं वा कुर्यात् । अयं प्रकोष्ठः पारम्परिकसंस्थानां प्रदर्शनस्य शैक्षणिकपरीक्षणं कुर्यात् । तेषां गुणावत्तासंवर्धनाय उपायं संस्तुयात् तथा च प्रदर्शनाधारेण संस्थानां कृते श्रेणीमपि दद्यात्।

## 8) वेदविद्यायाः कृते संस्तुतयः

**महर्षिसान्दिपनी वेदविद्यासंस्कृतविद्यापरिषद्**

1) समितेः अयमभिप्रायः विद्यते यत् संस्कृतस्य वैदिकस्य च अध्ययनस्य प्राथमिकस्तरं प्रेरणास्पदम्,उत्साहवर्धनम्,उल्लासपूर्णं च स्यात्।संस्कृतपाठशालासु संस्कृतसंभाषाणस्य कृते अधिकं महत्त्वं दातव्यं यतोहि भविष्यत्काले संस्कृतम् प्रभावपूर्णमाध्यमरूपेण विकासयितुं शक्येत।वैदिकपाठशालासु संस्कृतपाठशालासु च आधुनिकशिक्षाविषयाणामपि समरूपेण समन्वयः स्यात्। पाठशालासु पाठ्यक्रमाणां विषयः आधुनिकसमाजस्य अपेक्षानुरूपः प्राचीनज्ञानस्य उपयोगेन आधुनिकसमस्यानां परिहारोपायरूपश्च भवेत्।
2) वेदपाठशालानां विषये इदमपि ज्ञातं यत् संस्कृतस्य आधुनिकस्य च सामग्रीणाम् परिचयात्मकसहितस्य गुणवत्तायुक्तस्य पठनकौशलस्य अपेक्षा तेषां कृते अस्ति यतः छात्रः वेदभाष्यपर्यन्तम् अध्ययनं कर्तुं समर्थः स्यात्।कस्मिंश्चित् समुचितस्तरे वेदानां विकृतिपाठानाम् अध्ययनेपि लक्ष्यं भवेत् । सदस्यैः अस्मिन् विषये आस्था प्रकटिता यत् वेदपाठानाम् अध्ययनं भारते समानरूपेण न भवति अतः क्षेत्रीयोच्चराणप्रभेदेषु वैदिकोच्चारणस्य अध्यापनपद्धतौ वा विना अवरोधम् उन्नयनं भवेत् इति ।
3) अर्थपरम्पराम् अवलम्ब्य नैकरूपाणि गुरुकुलानि प्रचलन्ति अस्मिन् विषयेपि समित्या विचारः कृतः। समित्या इदमपि विचारितं यत् श्रमणपरम्परागुरुकुलान्यपि सन्तीति। एतेषु सर्वेषु गुरुकुलेषु समतोलनरूपेण आधुनिकविषयाणामपि परिचयः स्यादिति समित्या अभिप्रेतः।
4) समितेः विचारो वर्तते यत् एताभिः संस्थाभिः आयोज्यमानानां परीक्षाणां कृते आधुनिकशिक्षाप्रणाल्याः सीबीसीएस अनुरूपं मान्यता भवेत् इति। अपि च एतासु संस्थासु कार्यरतानाम् अध्यापकानाम् अध्ययनरतानां छात्राणां च कृते वेतनस्य छात्रवृत्तेः प्रदानेन सह पुस्तकालयसंबद्धमूलभूतसंरचनायाः कृते अपि वित्तीयसहयतां प्रयच्छेत्। अतः मानवसंसाधनविकासमन्त्रालयः विद्यलयस्तरीयपारम्परिकसंस्थानां गुणवत्तासवर्धनाय मान्यताप्रदानाय संबद्धताप्रदानय च परीक्षानिदेशालयस्य स्थापनां कुर्यात्, येन

पारम्परिकशिक्षणसंस्थाः आधुनिकविनूतनकार्यक्रमाणां संयोजनेन पारम्परिकज्ञानप्रणाल्याः दृढमूलस्य निर्माणं कुर्युः।

5) यथा वेदः संस्कृतं च परस्परम् अभिन्नं पोषकं च तथैव वेदपाठशालानां संस्कृतपाठशालानां च मन्यतासमस्या संबद्धतासमस्या च संपूर्णे देशे समाना अस्ति । अतः अनयोः समस्ययोः निवारणार्थं निदेशलयस्य स्थापना भवेत् । अस्य कार्यस्य संपादनाय उज्जयनीस्थितायाः महर्षिसान्दीपनीवेदसंस्कृतविद्यापरिषदः कृते परीक्षानिदेशालयस्य मान्यता प्रदीयेत, तथा च उज्जयनीस्थितमुख्यालयेन सहितं महर्षिसान्दीपनीराष्ट्रियवेदसंस्कृतविद्यापरिषद् (एमएसआरविएसविपि) इति नामकरणं स्यात् ।संस्थया प्रचाल्यमानकार्यक्रमैः क्रियाकलापैः सह परीक्षानिदेशालयरूपेणापि कार्यं कुर्यात्।

6) प्रस्तुतः निदेशालयः अष्टम-नवम-द्वादशकक्षाणां परीक्षाणाम् आयोजनं कृत्वा पूर्वोक्तनां पारम्परिकविद्यालयशिक्षाविषयेषु प्रमाणपत्रमपि प्रदद्यात् ।निदेशालयः पारम्परिकशिक्षायाः गुणवत्तां संवर्धयितुम्, अपेक्षानुगुणम् आधुनिकविषयाणां समावेशाय च सहायं कुर्यात्।

7) महर्षिसान्दीपनीराष्ट्रियवेदसंस्कृतविद्यापरिषदः निबन्धनपत्रे काञ्चीकामकोटिपीठस्य परमश्रद्धेयानां परमाचार्याणां चन्द्रशेखरसरस्वतीस्वामिपादानाम् इच्छानुसारं निर्देशानुसारं च वेदाध्ययनस्य विलक्षणा शब्दरक्षापरम्परा, आचार्यणां प्राचीनाभ्यासक्रमः, वेदपाठशालासु अनुवंशं प्रवर्तितः सदाचारः इति नाम्ना व्यवह्रियमाणः गुरुशिष्यसंबन्धः च इत्यादिप्रमुखविषयाः निबन्धनेषु संयोजिताः। इदमत्र वक्तव्यं यत् ईदृशाध्ययनाध्यपनपरम्परया उच्चारणसंप्रेषणेनैव च वैश्विकस्तरे यूनेस्कोसंस्थया वेदाः मान्यतां प्राप्तवन्तः। अतः सहस्त्रवर्ष प्रचीनवेदाध्ययनस्य शब्दपरम्परायाः शुद्धतायाः अखण्डतायाः च परिरक्षणाय महत्त्वं देयम् ।

8) उपन्यस्ते निदेशालये उल्लिखितानेकपारम्परिकज्ञानप्रणालीषु न्यूनातिन्यूनम् एकस्य संकायसदस्यस्य नियुक्तये संस्तुतः । एतेषु 1) शब्दपरम्परावेदपाठशालाः 2)अर्थपरम्परावेदपाठशालाः 3)संस्कृतपाठशालाः 4)श्रमणपरम्परापाठशालाः 5)गुरुकुलानि , संस्तुतौ सम्मिलितम् अस्ति।

9) उपन्यस्तस्य निदेशालयस्य कृते विद्यमानपाठशालानां विकासेन सह नवीनप्रणाल्याः पाठशालानां सर्जनाय अपि संस्तुतिः कृता । तद्यथा 1) वेदः संस्कृतं च मुख्यविषयरूपेण आधुनिकविषयाः गौणरूपेण पाठ्यमानाः पाठशालाः 2)आधुनिकविषयं मुख्यरूपेण वेदः संस्कृतं च गौणरूपेण 3)संस्कृतमाध्यमेन सामन्यशिक्षापाठ्यक्रमविद्यालयाः 4) वेद/संस्कृत- सन्ध्याविद्यालयाः, एते वेदानां संस्कृतस्य च कृते निरन्तरम् अत्यन्तापेक्षाः सन्ति। एतैः प्रयासैः वेदसस्कृतशिक्षायां विनूतनाध्यायस्य आरम्भः भवतीति दृढिष्ठो विश्वासः।

10) उपन्यस्तः निदेशालयः उपर्युक्तकार्यक्रमाणां परीक्षाभिः सह मुख्यलये अन्यविभागानामपि स्थापनां करिष्यति। तेषु 1) पाठशालासु सेवारतानाम् अध्यापकानां कृते प्रशिक्षणम् 2)डी.एड.बी.एड. कक्षानुरूपं पूर्वोक्तविषयेषु शैक्षिकविभागस्य स्थापनं संचालनं च 3)विकृतिपाठः,वर्णसारक्रमः, वेदाङ्गानि इत्यादिविषयाणाम् अध्ययनाय विभिन्नपद्धतीनां संरक्षणाय,संवर्धनाय,विकासाय च समर्पितः विभागः 4) शोधसामग्रीनिर्माणविभागः, संपादनप्रकाशनविभागश्च । अधुना देशे एतेषां चतुर्विधकार्याणां कृते महत्त्वं न प्रदीयते ।

11)समितिः इदमपि अनुजानाति यत् उपन्यस्तः निदेशालयः विद्यमानपाठशालानां समग्रविकासे सहायको भविष्यति पाठशालानां नूतनप्रयोगात्मकविकासाय प्रयासं करिष्यति च।अपि च आधुनिकविद्यालयानामनुरूपं वैकल्पिकरूपेण च भारतीयज्ञानाधारितविद्यालयशिक्षायाः विकासाय च प्रेरणादायकं कार्यं करिष्यति।

12)समितिः इदमपि संस्तौति यत् उपर्युक्तानां पाठशालानाम् आवर्तिव्ययस्य अनावर्तिव्ययस्य च कृते अनुदानरूपेण वित्तीयसहायता उदारं प्रदेया।येन भारतीयज्ञानप्रणाल्याः विकासे स्वदायित्वं समर्थरूपेण निर्वहेत्।अस्मिन् उद्यमे मापनदण्डः संख्यापेक्षया ज्ञानस्य मानवतायाः च कृते योगदानं महत्त्वपूर्णं भवति।

13)समित्या इदमपि संस्तुतं यत् ये अभिभावकाः बालानां कृते पारम्परिकरूपेण नियमाध्ययनम् इति पद्धत्या गृहे एव वैदिकज्ञानं प्रापयन्ति तेषामपि सहायः कार्यः।

14)समितिः इदमपि संस्तौति यत् उपलब्धा समस्तवाचिकलैखिकवैदिकज्ञानप्रणाली सद्यस्के (आन-लाईन) संस्थापनीया येन जनानां कृते सुलभरूपेणोपलब्धिः स्यात् ।

15)इदमपि अनुभूतं यत् देवलयानुष्ठानपद्धतिः, स्थापत्याध्ययनं च विलुप्तप्रायम् अस्ति। संस्तुता एमएसआरविएसविपि इदमपि कार्यं स्वीकृत्य पारम्परिकज्ञानप्रणाल्या नियमितपाठ्यक्रमं संचालयेत् एवम् अल्पावधिप्रशिक्षणपाठ्यक्रमं च समायोजयेत् । एतद्विषये प्राधिकृताधिकारिणां एतद्विषयविशेषज्ञानां वा सूची सद्यस्के (आन-लाईन) उपलब्धिः स्यात् ।

**वेदविद्यायाः संरक्षणाय संवर्धनाय सातत्याय च उपायाः**

वेदाः ज्ञानस्य भाण्डागारः , समग्रे विश्वे उपलभ्यमानेषु साहित्येषु प्राचीनतमाः च । अद्यावधि अनुस्यूततया गुरुशिष्यपरम्परया वाचिकरूपेण दोषराहित्येन प्रवहति । वेदाध्ययनस्य अस्याः मौखिकपरम्परायाः संरक्षणं,संवर्धनं ,विकासः च अस्माकं आद्यं कर्तव्यम् अस्ति अपि च पारम्परिकसंस्थानां पण्डितानं च कृते सहायता, अध्येतृवृत्तिप्रदानं,दृश्यश्रव्यनिर्माणम् इत्यादीनि कार्याण्यपि करणीयानि ।मौखिकसंप्रेषणप्रणाल्याः संरक्षणम् एवं प्राचीनस्वरभेदपरम्परायाः मानवीयोच्चारणपरम्परायाः च संरक्षणम् अतीवापेक्षितम् अस्ति। वैदिकज्ञानसंपन्नानां छात्राणां कृते शोधकार्याय सौकर्यं प्रदीयेत येन वैज्ञानिकपद्धत्या विश्लेषणप्रविधिना च संवर्धिता स्यात्। वेदेषु तेषां शाखासु निहिताः गणितम्,खगोलशास्त्रम्,पर्यावरणविज्ञानम्, रसायनशास्त्रम्,जलगतिशास्त्रम् इत्यादिवैज्ञानिकविषयाः आधुनिकविज्ञानेन प्रौद्योगिकेन च सह समावेशनेन आधुनिकवैज्ञानिकैः सह सामरस्यं स्थापितं भवेत्। एतदर्थं वेदपाठशालानां वैदिकविषयेषु शोधरतानां संस्थानां च पोषणं भवेत्। विभिन्नवेदशाखानाम् विलुप्तप्रायाणां वेदशाखानां च विषये अधिकमवधानं स्यात्। एतत्संरक्षणार्थं मानवीयभाण्डागारस्य अन्वेषणं कृत्वा सहायं कुर्यात् ।ज्ञानागारस्य ग्रन्थसामग्रीणाम् अवस्था, प्रकाशितपाण्डुलिपयः,ग्रन्थाः व्याख्याग्रन्थाः,इत्यादीनां परिचयात्मक-ज्ञानागारस्य सर्जनं भवेत् येन समग्रदेशे दृश्यश्रव्यमाध्यमेन अद्यतनस्थितेः परिचयः उपलभ्येत। प्राचीनवैदिककालादारभ्य अद्य यावत् वैदिकग्रन्थेषु वैदिकसाहित्येषु च निहितानां विज्ञानम्,कृषिः, प्रौद्योगिकम्,दर्शनम्,योगः,शिक्षा, काव्यशास्त्रम्, व्याकरणम्, भाषाविज्ञानम्, वेदपरम्परा इत्यादिविषयाणां शोधार्थं शिक्षाविदः शोधच्छात्राः च प्रोत्साहनीयाः तदर्थम् अपेक्षिताः मूलभूतसंरचनाः मानवशक्तेः च सहायः विधेयः।

## 9) वेदविद्याविकासार्थं योजनानां संस्तुतिः

**क) वेदविद्यायाः कृते विद्यमानाः योजनाः**

1) **मौखिकवाचनवेदविद्यापरम्परायाः ध्वनिमुद्रणम्,सांगणकीकरणम् इत्यादिना संरक्षणम्**

2) **वेदपाठशालानां कृते वित्तीयसहायता**

विद्यमानाः योजनाः अनुवर्तनीयाः। तथापि केषाञ्चन वेदपाठशालानां कृते अधिकं सहायं कुर्यात् । अप्रसिद्धशाखानां कृते प्रोत्साहनाय नवीनपाठशलानां स्थापना स्यात्।

3) **पारम्परिकाध्ययनयोजना**

पितृतः पितामहतः (पैतृकं मातृकं च) पितृव्यतः मातुलात् (पैतृकं मातृकं च) वा पैतृक्या वेदाध्ययनपरम्परया वेदाध्ययनं कुर्वन्ति तेषामपि वित्तीयसहयः भवेत् । शलाकापरीक्षया परीक्षणम्। संस्तुतस्य माध्यमिकनिदेशालयस्य माध्यमेन परीक्षायोजनम्। यदा अन्तेवासी सफलतया परीक्षां समापयति तदा टीटीडी-योजनानुरूपं एकलक्षपरिमितं धनराशिं प्रयच्छेत् ।

**ख) संस्तुताः नवीनयोजनाः**

1) **मौखिकवेदपरम्परायाः संगणकीकरणम् –** अस्याः योजनायाः अन्तर्गतम् एतानि कार्याणि कर्तुं शक्यन्ते ।

1)यत्र संगणकीकरणाय प्रयासः प्रचलति तेषामेकत्र समैकीकरणम् एवं यासां शाखानां संगणकीकरणं न जातं तेषामपि संगणकीकरणम् ।

2) एतत् कार्यं प्रायोजितसंस्थया, स्वयंसेविसंस्थया,सर्वकारेतरसंस्थया,संघयनेन औपचारिकसंस्थया अनौपचारिकसंस्थया वा संपादयितुं शक्यते।

3)कार्यमिदं यदि कयाचित् प्रायोजितसंस्थया संपादयिष्यति चेत् तस्याः कृते 80% प्रतिशतं वित्तीयसहायं दातुं शक्यते।

4) यदि कार्यमिदं कयाचित् सर्वकारीयप्रायोजितसंस्थया संपादयिष्यति चेत् वास्तविकः धनराशिः प्रदीयेत।

2) **प्रकानार्थम् अनुदानम् -** अस्याः योजनायाः अन्तर्गतं वेदसंबद्धानां ग्रन्थानां प्रकाशनार्थं सहायः।

3) **वेदान् लोकप्रियं कर्तुं सहायः -** अस्याः योजनायाः अन्तर्गतं लघुग्रन्थानां प्रकाशनाय प्रोत्साहः।

4) **समाजाय वेदाः -** अस्याः योजनायाः अन्तर्गतं वेदविद्यां समाजस्य सर्ववर्गीयजनपर्यन्तं क्रमबद्धरूपेण प्रापणाय प्रोत्साहः क्रियते।

5) **विकृतिपाठानां संरक्षणम् -** अस्याः योजनायाः अन्तर्गतं वेदपाठिनां कृते विविधविकृतिपाठानाम् अध्ययनाय प्रोत्साहः प्रदीयते। एवं विकृतिपाठानां संगणकीकरणमपि क्रियते।

6) **वर्णसारक्रमस्य परिरक्षणम् -**वेदाध्ययनस्य अयं क्रमः विलुप्तप्रायः विद्यते अतः अस्य कृते प्रोत्साहनस्य सशक्तीकरणस्य च अपेक्षा अस्ति। वेदपाठिनां कृते अस्मिन् अध्ययनक्षेत्रे गभीरप्रशिक्षणं प्रदीयते।

7) **अखिलभारतीयवेदस्पर्धा -** अस्याः योजनायाः अन्तर्गतं वेदानां विभिन्नशाखानां विविधक्रमे राज्यस्तरे राष्ट्रस्तरे च अखिलभारतीयवेदस्पर्धा आयोजिता भविष्यति। अपि च पुरस्कारधनराशिः प्रदीयते येन वेदाध्ययनाय प्रेरणा लभ्येत ।

## 10) संस्कृतस्य विकासाय योजनानां संस्तुतिः

**क)वर्तमानयोजनाः**

भारतसर्वकारः विगतेभ्यः त्रिशतेभ्यः वर्षेभ्यः नोडल एजन्सि नवदेहलीस्थस्य राष्ट्रियसंस्कृतसंस्थानस्य माध्यमेन विभिन्नयोजनानां क्रियान्विर्तिं कुर्वन् अस्ति। अनया समित्यापि अमूषां योजनानाम् समर्थनं क्रियते तथा च आसां योजनानां सुचारुरूपेण संचालनमपि अनुमन्यते। समितिः अभिलषते यत् आसां योजनानां अधिकसार्थकतां प्रभावपूर्णं च विधातुम् अधोलिखिताः प्रयासाः अपेक्षिताः–

1)आसां योजनानां पारिश्रमिकः उपबन्धः अस्ति, तत्र 50% तः 100% यावत् वृद्धिः भवति, किन्तु योजनारम्भात् यत् पारिश्रमिकं संस्तुतम् आसीत् तत् 1) पारिश्रमिकं योजनारम्भादेव अल्पम् आसीत्।2)बहुभ्यः वर्षेभ्यः तस्य संशोधनं न जातम् ,3)अन्ययोजनानां तुलनायाम् पारिश्रमिकं अत्यल्पम् ,4) योजनायां समयस्य अनुबन्धस्य च परिवर्तनम् अपेक्षितम्।

2)आसां योजनानाम् अन्तर्गतं मानवसंसाधनस्य उपलब्धिं कारयितुं शक्यते तत्सम्बन्धे इयं संस्तुतिः –

क) यदि योजना अध्यापनपदस्य संबद्धं तर्हि केन्द्रीयविद्यालयस्य स्तरे दीयमानस्य वेतनस्य अन्यव्ययस्य (D.A) च अनुरूपं योजनान्तर्गतेभ्यः अपि दातुं निश्चयं कुर्यात्।

ख) यदि महाविद्यालयस्तरस्य पदं स्यात् तदा अनुबन्धितरूपेण अध्यापकस्य नियुक्तेः निर्धारणं कुर्यात्।

3)मूलभूतसंरचनायाः कृते संबद्धस्य अनुदानस्य विषयः स्यात् तदा अनुदाने50% वृद्धिः भवेत् ।

4)यदि राज्ये संस्तुतिसंबद्धः प्राधिकारः नहि स्यात् तदा अन्यप्राधिकारेण जनस्य चयनं स्यात्।

5) वित्तीयसहायः तान्त्रिकपरिवर्तनप्रणाली(Electronic Transfer System)माध्यमेन कर्तुं प्रभवति।

6)इदमपि दृष्टं यत् योजनान्तर्गतं राष्ट्रपतिपुरस्कारार्थम् आवेदनपत्राणां स्वीकृतिः विचारः,चितानां सूच्याः समर्पणं च क्रियते। राष्ट्रपतिपुरस्काराय चयनार्थं पुस्तकानां शोधपत्राणां च प्रकाशनं, राष्ट्रियासु अन्ताराष्ट्रियासु संगोष्ठीषु भागग्रहणादीनां मापनं विद्यते।इदं मापनं विश्वविद्यालयस्तरे सेवारतानां विदुषां कृते औचित्यम् आवहति,किन्तु परम्परागतविदुषाम् इदं मापनं समीचीनं न,तेषामपि योजनायाम् अन्तर्भावः मुख्यं ध्येयम् अस्ति।अतः पारम्परिकसंस्कृतविदुषां वेदपाठिनां च पुस्तकादीनां मापनं न स्यात्। किन्तु

शास्त्रार्थसभायां वेदसभायां च भागग्रहणं,शास्त्रीयवैदिकविषयाध्ययनार्थं विश्रुतपीठेभ्यः विख्यातमठेभ्यः समितिभ्यः च दीयमाना पुरस्कृतिः संस्तुतिश्च मापनरूपेण स्वीकर्तुं शक्यते।

7)प्रदीयमानस्य बादरायणपुरस्कारस्य चयनमापने अप्रकाशितस्य दुर्लभस्य न्यूनातिन्यूनं 200पृष्ठयुक्तस्य पाण्डुलिपिग्रन्थस्य महत्त्वविषये समालोचनात्मकटिप्पणीसहितं संपादनं प्रकाशनं च मुख्यबिन्दुः स्यात्।अनेन अप्राप्तज्ञानभाण्डागारस्य प्रकाशने अपेक्षितं साफल्यं लभ्यते।

**ख) संस्कृतस्य विकासाय संस्तुताः नवीनयोजनाः**

**1) स्वतन्त्रात् पूर्वं स्थापितानां संस्कृतविद्यालयानां पुनरुद्धारः।**

1)इदानीं कार्यरताः नैके विद्यालयाः स्वतन्त्रात् पूर्वं स्थापिताः,किन्तु अपेक्षितसमग्रभावेन जीर्णाः शीर्णाः च तेषाम् उद्धारः भवेत्।

2)महाविद्यालयानां शोधसंस्थानाम् अभिज्ञात्यर्थं समितेः आरचनम्।

3)गुणात्मकशिक्षायाः प्रोन्नतिः।

4) शास्त्रपरम्परागतविद्वद्भ्यः लाभस्य आपूर्तिः।

5)विशुद्धशास्त्रीयपरम्परायाः रक्षणम्।

6)एवं महाविद्यालयेभ्यः शोधसंथाभ्यश्च पञ्चवर्षणां कृते समुचितपारिश्रमिकसहितं मानवसंसाधनस्य आपूर्तिं कर्तुं शक्यते। यदि तासां संस्थानां शैक्षिकमूल्याङ्कनं समुचितं तर्हि आपूर्तेः परिवर्धनं भवेत्।

**2)पाठशालानां कृते साहाय्यम्**

अस्याः योजनायाः अन्तर्गतम् ऐककालिकम् अनुदानं दद्यात्, तेन विषमपरिष्ठितौ अपि स्थातुं शक्नुयात्। प्रदत्तानुदानं संरचनायै शैक्षिकविकासाय च व्ययं कुर्यात्।

**3)पाण्डुलिपिपुस्तकालयस्य प्राच्यशोधसंस्थायाः च कृते आश्वासनम्**

विलुप्तप्रायाणां पाण्डुलिपिपुस्तकालयानां प्राच्यशोधसंस्थानां च पुनरुद्धाराय ग्रन्थालयकर्मचारिणां पारिश्रमिकं दातुम् अनुदानस्य उपलब्धिः स्यात्। प्रतिलिपिविद्वान्, संग्राहकविद्वान् पाण्डुलिपीनां वैद्युतीकरणम् इत्यादिकार्याय मानवसंसाधानस्य अवश्यकता अस्ति। प्रदर्शनकौशलनियमानुगुणम् अन्याभ्यः बाह्यसञ्चिकाभ्यः मानवसंसाधनस्य आपूर्तिः भवितुमर्हति।

**4) शास्त्रसंरक्षणयोजना**

अनया योजनया शास्त्रशिक्षणपरिरक्षणाय पारम्परिकशास्त्रविदुषां सदुपयोगः भवति।इयं परियोजना मार्गद्वयेन क्रियान्वितिः भवितुमर्हति। 1)औपचारिकशिक्षाप्रणालीद्वारा,2)अनौपचारिकशिक्षाप्रणालीद्वारा च।

**क)औपचारिकशास्त्रशिक्षाधिगमप्रणाली**

अनया योजनया आचार्यकक्षाधिगतान्तरमपि शास्त्राध्ययनपरिपाट्याः अनुरक्षणं भवति। विभिन्नशास्त्रग्रन्थानां गुरुमुखात् वर्षत्रयम् अध्ययनं कर्तुं प्रभवति।अवश्यानुगुणम् औपचारिकोपाधिमपि दातुं शक्यते।प्रत्येकं विशेषज्ञाय गुरवे समुचितं पारिश्रमिकं दीयते ,अपि च प्रत्येकं शिक्षार्थिभ्योपि यथायोग्यं छात्रवृत्तिः दीयते।संस्कृतसंस्थासु निर्धारितपाठ्यक्रमम् अतिरिच्य ग्रन्थांशाः योजनायामस्यां पाठ्यन्ते तद्यथा महाभाष्यस्य नवाह्निकात् परं विद्यमानमहाभाष्यस्य अध्ययनम्, सिंहलक्षणस्य व्याघ्रलक्षणस्य च अध्ययनम्,मीमामसाशास्त्रस्य द्वादशाध्यायानां पठनम्,श्रौतग्रन्थानामपि अध्ययनमपि अत्र अन्तर्भवति।

**ख)अनौपचारिकशास्त्रशिक्षाधिगमप्रणाली**

अस्यां योजनधारायां गुरुकुलप्रणाल्याः पुनरुद्धारः क्रियते अपि च पारम्परिकपद्धत्या स्वस्थाने वसतां विदुषाम् अध्यापनसेवा स्वीक्रियते।शास्त्रीयपरम्पारायाः रक्षणार्थं ज्ञानविनिमयार्थं च शास्त्राणि अध्याप्यन्ते। विशिष्टस्य एकस्य शास्त्रस्य अध्ययनार्थं पञ्च छात्राः एकस्य गुरोः अधीने नियोज्यन्ते।अधीतशास्त्रीयविद्यानांशलाकादिपरीक्षाद्वारा परीक्षणं क्रियते।प्रत्येकम् अध्यापकाय छात्राय च पारिश्रमिकं छात्रवृत्तिश्च प्रदीयते।अनया योजनया पारम्परिकविद्वत्ता शास्त्राधिगमप्रणाली च संरक्ष्यते। गुरुकुलप्रणाल्याः पुनरुद्धारः शास्त्रस्य रक्षणं च भवेत्।अनया शास्त्राधिगमप्रणाल्या नूतनाध्ययनक्रमद्वारम् उद्घाटितं भवेत्।

## 11)अष्टादशी संस्कृतस्य निरन्तरविकासाय अष्टादश परियोजनाः

संस्कृतस्य विकासाय अधोङ्किंतानाम् अष्टादशपरियोजनानां क्रियान्वयनस्य अवश्यकता अस्ति। सर्वाः परियोजनाः राष्ट्रियसंस्कृतसंस्थानं संचालयितुं प्रभवति अथवा संस्कृतविकाससंबद्धसंस्थाभ्यः सर्वकारप्राधिकारसंस्थाभ्यः (NGO)दातुं शक्यते।योजनायाः क्रियान्वयनाय युवसंस्कृतविद्वांसं सेवानिवृत्तसंस्कृविद्वांसं वा विश्वविद्यालयानुदानायोगेन संविदाध्यापकेभ्यः संस्तुतवेतनानुगुणं संविदाध्यापकं कार्यानुगुणं नियोजयेत्। ज्ञेयं यत् नियुक्तः अध्यापकः दक्षः शुद्धसंस्कृतसंभाषणं च जानीयात्। अपेक्षितकार्यसूची स्पष्टरूपेण निर्धारिता स्यात्।एभिःपरियोजनाभिः उक्तोद्देश्यस्य आपूर्त्या सह संस्कृतस्नातकानां कृते आजीविकायाः सर्जनं भवतीति समित्या निवेद्यते।

**1)ज्ञानात्मकसाहित्यानुवादपरियोजना**

विद्यालयशिक्षातः विश्वविद्यालयशिक्षासंबद्धानि कला-विज्ञान-वाणिज्य-व्यावसायिकादीनि अन्यभाषासु उपलब्धानि यानि ज्ञानसाहित्यानि तानि संस्कृतभाषया अनूद्यन्ते।तथा च वैद्युतमाध्यमेन प्रकाशितं भवेत्।

**2) पाण्डुलिपीनाम् संपादनं प्रकाशनं च**

चतुर्दशविभिन्नलिपिषु लिखिताः 45लक्षपाण्डुलिपयः 4000अधिकपुस्तकालयेषु उपलभ्यन्ते। अनुमीयते च प्रकाशितपाण्डुलिपीः अतिरिच्य लक्षाधिकाः पाण्डुलिपयः अप्रकाशिताः सन्ति ।एताः न केवलं साहित्यदृष्ट्या महत्त्वपूर्णाः किन्तु वर्तमानसंन्दर्भे शोधविषयेपि उपयोगिन्यः सन्ति।अतःएतासां पाण्डुलिपीनां संपादनपूर्वकं प्रकाशनं कुर्यात्। पाण्डिलिपिसंपादनाभिज्ञस्य संसकृताभिज्ञस्य च विदुषः प्राप्त्यर्थं यथासंभवं संस्कृतसंस्थासु पाण्डुलिपिसंपादनप्रशिक्षणकार्यक्रमः संचालितः भवेत्।

**3)डिजिटल एवं ऑन-लाईन-परियोजना**

सर्वासां संस्कृतकृतीनां डिजिटलरूपेण रूपान्तरणं कृत्वा अन्तर्जाले संस्थापयेत् ।अथ तासां कृतीनाम् अन्तर्जाले उपलब्धिः स्यात्। एतदतिरिच्य भिन्नपाठ्यक्रमाणां य़था प्रारम्भिकपाठ्यक्रमस्य ,माध्यमिकपाठ्यक्रमस्य,स्नातकपाठ्यक्रमस्य स्नातकोत्तरपाठ्यक्रमस्य,भाषापाठ्यक्रमस्य विभिन्नशास्त्रकाव्याधारितपाठ्यक्रमस्य च विकासः स्यात्।एवं रीत्या नैके पाठ्यक्रमान् अभिवर्धयितुं शक्यते।एतेषाम् उपलब्धिः संपूर्णे विश्वे न केवलं संस्कृताध्ययने अभिरुचियुक्तानां जनानाम् अपि तु सम्पेषणप्रौद्योगिक(ICT)कक्षाध्यापकोपि प्रयोगे आनयितुमर्हति।

**4)ग्रीष्मकालिकपाठ्यक्रमयोजनाः**

नैके जनाः संस्कृतव्याकरणं भिन्नशास्त्राणि संस्कृतरचनानि च अध्येतुं वाञ्छन्ति ।संस्कृताध्यापकाः संस्कृतच्छात्राश्च अन्यं विषयं पठितुम् अभिलषन्ति।अवश्यानुगुणं ग्रीष्मावकाशे उल्लिखितविषयेषु भिन्नपाठ्यक्रमनिर्माणं कर्तुं शक्यते।ग्रीष्मकालिकपाठ्यक्रमविषये प्रत्येकं संस्कृतविश्वविद्यालयः भिन्नपाठ्यक्रमविषयं निर्धारयितुं प्रभवति।अनेन ग्रीष्मकालिकपाठ्यक्रमे भागग्रहणाय अध्यापकानां छात्राणां च सौविध्यं स्यात्।

**5) समकालिकसाहित्यपरियोजना**

भाषायाः साहित्ये तत्समकालिकसमाजस्य विमर्शस्य चिन्तनस्य प्रतिबिम्बम् अपेक्षितम्।एतदेव जीवितभाषायाः मानदण्डः भवति।यद्यपि संस्कृतभाषायां समकालिकविषयपुस्तकानां प्रकाशनं जायमानम् अस्ति तथापि अस्मिन् विषये अधिककार्यस्य अपेक्षा विद्यते। अतः अनया परियोजनया समकालिकविषयस्य लेखनाय विदुषः प्रोत्साहयेत्।संस्कृते लेखनाय प्रकाशनाय च उदारेण अनुदानं दीयेत।

**6)सन्ध्याकालिकविद्यालयपरियोजना**

नियतच्छात्राः अध्ययनपाठ्यक्रमेण सह अभिरुच्यनुगुणम् अन्यपाठ्यक्रमान् अपि सन्ध्याकालिककक्षामाध्यमेन पाठयितुं शक्यते। ये विद्यालये संस्कृतं नाधीतवन्तः तेपि अन्यकार्यं कुर्वन्तः सन्ध्याकालिककक्षासु पठितुं प्रभवन्ति। उद्दीप्तावश्यकतायाः न्यूनातिन्यूनं महानगरेषु संस्कृतसंन्ध्याविद्यालयेन सन्ध्यामहाविद्यालयेन पूर्तिः स्यात्। अनेन संस्कृतशिक्षणस्यापि वेगः वर्धते।

**7) प्रौद्योगिकस्वीकृतिपरियोजना**

समृंस्कृतप्रयोगसंबन्धिनीनां समुचितवर्णलेखः(Font),एप्स,ओ.सी.आर्. सॉफ्टवेर, वर्चु वलकक्षाः अन्वेषणी(Search)परीक्षाणां ऑन-लाईन प्रबन्धनम् इत्यादीनां प्रौद्योगिकसमस्यानां निवारणं जायमानम् अस्ति, तथापि नवीनप्रौद्योगिकसम्बद्धप्रणालीसंवर्धनम् अनिवीर्यं विद्यते।संस्कृतविकासाय नूतनप्रौद्योगिक्याः स्वीकृतिरपि अनिवार्या।अतः निरन्तरं संवर्धमानप्रौद्योगिकक्षेत्रे संस्कृतस्य नैरन्तर्यम् अपेक्षितमस्ति।

**8) संगणकशिक्षापरियोजना**

इदं निश्चितं यत् संस्कृतं सर्वाधिकस्वाभविकानुकूलभाषा विद्यते किन्तु महान् विच्छेदः संगणकप्रयोग-संस्कृतभाषयोर्मध्ये।प्रौद्योगिकक्षेत्रे संस्कृतस्य पृष्ठगमनस्य इदमपि कारणमस्ति। अतः संस्कृताध्यापकानां छात्राणां कृते संगणकशिक्षाप्रदानाय राष्ट्रिय- उर्दूप्रोत्साहन-परिषद्-द्वारा अथवा

नूतनप्रशिक्षणकेन्दम्उद्घाटयितुं शक्यते। प्रशिक्षणाय संगणकक्षेत्रे अभिरुचियुक्तस्य संस्कृतानुदेशकस्य नियोजनेन अधिकः प्रभावः स्यात्।

**9)द्वैवार्षिकसंस्कृतपुस्तकमेलापरियोजना**

2011तमे बेङ्गलूरुनगरे चतुर्दीवसीय-विश्वसंस्कृतपुस्तकमेला समायोजिता आसीत् । 154 प्रकाशकाः भागम् ऊढवन्तः।अस्यां मेलायां चतुर्लक्षमिताः जनाः समवेताः चतुर्लक्षरूप्यकाणां पुस्तकानां विक्रयणं च जातम् आसीत्।अयं कश्चन नबीनः अनन्यश्च प्रयोगःअभवत्। ततःप्रभृति जनतायाः विद्यालयप्रबन्धकानां च अपेक्षा अस्ति यत् एतादृश्यः मेलाः प्रतिराज्यं राजधान्याम् आयोजनीया यतोहि संस्कृतपुस्तकानां सर्वत्र उपलब्धिः नास्ति।अपेक्षितपुस्तकानि अनिमातुं शक्यते इति संस्कृतपुस्तकप्रकाशकानां निवेदनं विद्यते।कस्मिंश्चित् राज्यस्य राजधान्यां वर्षद्वयस्य अन्तराले संस्कृतस्वयंसेविसंघसहयोगेन संस्कृतपुस्तकमेला आयोजयेत्।

**10)कार्यक्रमप्रसारपरियोजना**

संस्कृतविद्यालयेषु विश्वविद्यालयेषु च छात्रसंख्यावर्धनाय तत्तद्विद्यालयेषु महाविद्यालयेषु च अल्पकालिकपाठ्यक्रमसंचालनाय प्रेरयितुं शक्यते।संस्कृतसंबद्धपाठ्यक्रमसंचालनाय मानवसंसाधनस्य सहयोगः दीयते,तेन भिन्नभिन्नस्थानेषु पाठ्यक्रमं चालयितुं शक्यते ।तस्मिन् क्षेत्रे विद्यमानेषु विद्यालयेषुमहाविद्यालयेषु संस्कृतस्य लोकप्रियता वर्धेत।

**11)शब्दशालापरियोजना**

दैनन्दिनव्यवहाराय आधुनिकविषयसंप्रेषणाय लेखनाय च संस्कृतभाषाप्रयोगःकियते तथापि संस्कृते आधुनिकशब्दानां न्यूनता अस्त्येव। सी.एस्.एस्.टि. द्वारा आकलितेषु शब्देषु सर्वे शब्दाः संस्कृते न सन्ति। संस्कृते असंख्याकानां शब्दानां निर्माणसामर्थ्यं अस्ति किन्तु न कयाचित् संस्थया न केनचन विदुषा समुचितप्रयासः न विहितः।इदमपि आवश्यकं यत् नवनिर्मितशब्दानां देशे स्वीकारः स्यात् सरलसंस्कृते च भवेत्।एवं प्रकारेण भिन्नवर्गाणाम् अन्तर्गतं चिह्नितकार्याणि संस्कृतविश्वविद्यालेभ्यः संस्कृतसंस्थाभ्यः दातुं शक्यते । प्रत्येकं संस्था भिन्नभिन्नमातृभाषायाः विद्वांसं नियोज्येत तेन बहुभाषाप्रक्रियाधारेण निर्मितः शब्दः देशे स्वीकार्यः स्यात्।

**12)दुर्लभपुस्तकानां पुनः प्रकाशनपरियोजना**

स्वतन्त्रतायाः पूर्वं निर्णयसागरप्रेस-इत्याद्यःनैकाः प्राच्यशोधसंस्थाः संस्कृतस्य महत्त्वपूर्णम् अमूल्यग्रन्थं शुद्धरूपेण मुद्रयन्ति स्म।अधुना अधिकांशग्रन्थाः न उपलभ्यन्ते। आधुनिकपरिस्थितौ तेषां सविधे पुनर्मुद्रणाय पर्याप्तार्थिकसंसाधनस्य उपलब्धिः नास्ति। अतः राष्ट्रियसंस्कृतसंस्थानात् सर्वकारवित्तीसहायतासंपन्नसंस्थातः मानवसंसाधनविकासमन्त्रायतः वा वित्तीयसहायं प्राप्य दुर्लभपुस्तकानां पुनर्मुद्रणं भवेत् ।दीर्घकालिक-संरक्षणाय बैद्युतीकरणं च कुर्यात्।

**13)आवासीयप्रशिक्षणपरियोजना**

यां भाषाम् अध्येतुमिच्छति तां भाषां तस्याःभाषायाः वातावरणे एव अध्यापयेत्। तदैव शिक्षार्थी भाषायाः चतुर्मुखकौशलं स्वाभाविकरूपेण प्राप्तुं शक्नोति। कुशलाध्यापकानाम् उपलब्धये सर्वेषु राज्येषु अध्यापकेभ्यः छात्रेभ्यः स्वयम्सेविजनेभ्यः भिन्नभिन्नस्तरेषु भिन्नभिन्नसमये प्रशिक्षणशिबिरस्य आयोजनं भवेत्।

**14)संस्कृताधुनिकविषयाणां सामैक्यपरियोजना**

संस्कृताधुनिकयोः विषययोः ज्ञातारः विद्वांसः अत्यल्पाः सन्ति। अस्य एकमेव समाधानं संस्कृतविद्वांसः आधुनिकविषयं पठेयुः आहोस्वित् आधुनिकविषयविद्वांसः संस्कृतं पठेयुः।कश्चन एकस्याः ज्ञानशाखायाः अध्ययनं समाप्य अन्यज्ञानशाखां पिपठिषति तादृशस्य स्नातकस्नातकोत्तरजनस्य कृते अध्येतृवृत्ति(Fellowship)व्यवस्था कल्पनीया।

**15) आन्तरिकसहायकपरियोजना**

आई.आई.टि,एन्.आई.आई.टि ,अथवा एसी.आई.टी.ईद्वारा अनुमोदिततान्त्रिकमहाविद्यालयस्य छात्राणां कृते एतदृशपरियोजना स्यात्, यतः अध्ययनकाले कस्याश्चित् संस्कृतसंस्थायाः कस्यचन आचार्यस्य अधीने संस्थानिकप्रशिक्षणस्य चयनं कुर्वन्ति,अपि च तेभ्यः संपुटः(Credits)उपलभ्यते। तेभ्यः छात्रेभ्यः क्वचित् वित्तीयसहायः स्यात् तदा संस्कृतसाहित्ये अन्तर्निहितज्ञानप्रकाशने तेषां कौशलस्यापि उपयोगः भवेत्। यद्यपि परियोजना लघुस्तरे भवति, अपि च संस्कृतसंस्थायाः संस्कृतविदुषः लक्षितः प्रायसः विद्यते।

**16) बालसाहित्यपरियोजना**

बाल्यावस्थायाम् एव भाषायाः संभाषणम् अध्ययनं च स्यात् ।अधुना बालसाहित्यम् अन्यासु भाषासु विविधवर्णीयानि पुस्तकानि, फलकानि,सान्द्रमुद्रिकाः,गीतानि,व्यङ्ग्यचित्राणि,चलनचित्राणि, डोक्युमेण्टरी,व्यङ्ग्यचित्रपुस्तकानि,अमरचित्रकथाएप्स,इत्यादीनि प्राचुर्येण उपलभ्यन्ते। सहस्राधिकदूरदर्शनानि वेब्-पोर्टलादीनि अधिकतया बालसम्बद्धान् कार्यक्रमान् प्रसारयन्ति।संस्कृतस्यापि एतादृशबालसाहित्यप्रणाल्यां भागग्रहणं भवेत्।

**17)संस्कृतमाध्यमेन योगपरियोजना**

संस्कृतसाहित्यस्य उत्तमयोगदानं विद्यते योगः।अतः संस्कृतमाध्यमेन योगस्य योगमाध्यमेन संस्कृतस्य अध्ययनाय केन्द्राणि स्थापनीयानि। योगसंबद्धग्रन्थान् संस्कृतमाध्यमेन अध्येतुं बहवः इच्छन्ति। अतः ओ.एन्.जी.सी. सी.एस्.आर् इत्यस्य वित्तीयसहायेन संस्कृतप्रोत्साहनन्यासः(S.P.F)एतादृशपाठ्यक्रमस्य अध्यापनाधिगमशिक्षणसामग्रीणां निर्माणं कुर्वाणः विद्यते।प्रस्तावितकेन्द्राणि एतत्सामग्रीणाम् उपयोगं कर्तुं शक्नुवन्ति अथ च योगसंस्कृतविज्ञं केन्द्राणि नियोजयितुं प्रभवति।

**18)संस्कृतमाध्यमेन आयुर्वेदपरियोजना**

आयुर्वेदस्य भाषा एव संस्कृतं विद्यते।स्वस्थजीवनाय सर्वे आयुर्वेदस्य अध्ययनं कुर्युः।संस्कृतमाध्यमेन आयुर्वेदकक्षाणां संचालनस्य अपेक्षा वर्धते एव। आसां कक्षाणाम् उद्देश्यं न तु वैद्यस्य निर्माणं किन्तु सकारात्मकमनोमस्तिष्कस्य निर्माणं विद्यते।

## 12)सामान्यसंस्तुतयः

समित्या यद्यपि भिन्नभिन्नविभागानां कृते संस्तुतिः कृता किन्तु मुख्यसंस्तुतयः एव सन्ति –

1) संस्कृतस्य अध्ययनं सरलम् आकर्षकं च कर्तुं संस्कृताध्यापकानां सहभागिता संभाषणप्रावीण्यं च महत्त्वपूर्णं विद्यते ।एतदर्थं संस्कताध्यापकप्रशिक्षणकार्यक्रमः व्यापकरूपेण करणीयः अस्ति। आगामिषु त्रिचतुरेषु वर्षेषु देशे पञ्चलक्षसंस्कृताध्यापकानां कृते एकैकसप्ताहस्य चरणद्वये प्रशिक्षणं दत्वा प्रशिक्षितान् कुर्युः। मानवसंसाधनविकासमन्त्रालयस्य विद्यालयीयशिक्षाविभागः एतदर्थं योजनां निर्माय 2016-17 वर्षतः अस्मिन् क्षेत्रे कार्यरतानाम् अन्यशैक्षिकसंस्थानां सर्वकारेतरसंस्थानां वा सहायोगेन एससीआरटी,डीआईईटी माध्यमेन क्रियान्वयनं कुर्यात्।

## 2) संस्कृतशिक्षावर्षम्

अस्यां परिकल्पना एवं मार्गसूच्यां (Vision and Road Map)विद्यमानानां बह्वीनां संस्तुतीनां साक्षात् संबन्धः संस्कृतशिक्षापाठ्यक्रमः,पाठ्यपुस्तकानि,शिक्षणप्रणाली,मूल्याङ्कनपद्धतिः, अग्रणीपरियोजनाः,अध्यापकप्रशिक्षणम्, नवीनपाठ्यक्रमः इत्यादिषु परिष्कारं कृत्वा संस्कृतशिक्षायाः पुनरुद्धारं कर्तुं विद्यते। संस्कृतशिक्षया सह सम्बद्धं प्रत्येकं जनम् एतेषु विषयेषु विचिन्तयितुं प्रत्येकं संस्कृताध्यापकम् सक्रियरूपेण अस्मिन् कर्मणि संयोजयितुं शीघ्रारम्भाय च 2017-18 वर्षं संस्कृतशिक्षावर्षम् इति रूपेण समाचरणाय संस्तुतम्।अस्मिन् वर्षे संस्कृताध्यापकाः न केवलं स्वसंस्थायाः कक्षासु संस्कृतमाध्यमेन संस्कृतं पाठयित्वा संस्कृतवातावरणं निर्मान्ति किन्तु स्वसंस्थां परितः सार्वजनिकरूपेण विद्यमानानां संस्कृतच्छात्राणां कृते तत्स्थानेषु संस्कृतसंभाषणवर्गस्य समायोजनं करिष्यन्ति। संस्कृतशिक्षयाः आधुनिकीकरणाय लोकप्रियां कर्तुं च ग्रन्थप्रकाशनैः सह संगोष्ठीनां, कार्यशालानां, शैक्षिककार्यक्रमाणां च समायोजनं भविष्यति।भारतसर्वकारेण पञ्चकोटिपरिमितवित्तीयसहायेन सह 2000-2001 वर्षं संस्कृतवर्षत्वेन उद्घोषणा कृता आसीत्। तेन प्रकारेण संस्कृतशिक्षावर्षमपि समाचरितं स्यात् एतदर्थं पर्याप्ता वित्तीयसहायतापि उपलभ्यते चेत् अस्मिन् वर्षे संस्कृतविकासाय चिरप्रतीक्षितान् भाविनः च उपायान् कर्तुं शक्येत ।

3) राष्ट्रियमाध्यमिकशिक्षाभियानस्य (आ.रएमएसए)अन्तर्गतं सूचनासम्प्रेषणाप्रौद्योगिक्याः(आईसीटी) संस्कृतविद्यालयेषु एकं केन्द्रं भवेत्। येन संस्कृतच्छात्राणां कृते आईसीटी- कौशलम् अभिवर्धयितुम् अवकाशः लभ्यते अपि च संगणकीयाधिगमप्रक्रियामाध्यमेन शिक्षणं प्राप्तुं शक्यते। इयं योजना विभिन्नानां सामजिक-आर्थिक-शैक्षिकबाधायुक्तानां संस्कृतच्छात्राणां डिजिटल-अक्षमतां दूरीकर्तुं सहायको भवति। आईसीटी संस्कृतमहाविद्यालयस्तरपर्यन्तं विस्तारयितु शक्यते।

4) अस्याः समितेः सर्वासां संस्तुतीनां कार्यान्वियनाय संघटनानां संस्थानां च कृते अधिकानां मानवसंसाधनानाम् अपेक्षा स्यात्। राष्ट्रियसंस्कृसंस्थानस्य कृते अपि योजनाप्रबन्धनाय, परियोजनानां क्रियान्वयनाय च प्रशासकीयजनानाम् अपेक्ष भवति। अपि च अनेन सह सामग्रीनिर्माणं, प्रशिक्षणम्,अध्यापनं च संचालनीयं भवति। मानवसंसाधनविकासमन्त्रालयः आद्यतानुसारं कार्यं सुगमं कर्तुं शक्नोति। अपि च अधिकांशक्रियाकलापानां कार्यक्रमाणां च संस्कृतमाध्यमेनैव क्रियान्वयनेन सह संस्थानतः अपि जनाः इच्छन्ति यत् न्यूनातिन्यूनम् आन्तरिकव्यवहारः संस्कृतभाषया स्यात् इति।अतः समितेः प्रस्तावः अस्ति यत् राष्ट्रियसंस्कृतसंस्थानम् शिक्षकेतरपदेषु अपि संस्कृतस्नातकस्य संस्कृतस्नातकोत्तरस्य,संस्कृतसंभषणसमर्थस्य वा अभ्यर्थिनःनियुक्तिः स्यात्। येन संस्कृतच्छात्राणाम् आत्मविश्वासः द्विगुणितं वर्धेत।

**5) संस्कृतविदुषाम् आह्वानम्**

समित्या विद्वत्ससुदायः अनुरुध्यते यत् 1) संस्कृभाषायाः अधिकः प्रयोगः न केवलं कक्षासु किन्तु कक्षातः बहिः सर्वेषु अवसरेषु संभाषणरूपेण प्रयोगं कुर्यात्। 2) भावनात्मकस्य अर्थविहीनस्य च याच्ञा न भवेत् (यथा संस्कृतम् सर्वत्र अनिवार्यं भवेत् इत्यादि) 3) समसामयिकस्य राष्ट्रियस्तरस्य वादेषु संस्कृतसाहित्याधारिततर्केण सह सोत्साहं भागग्रहणं कुर्यात्। 4) संस्कृशिक्षणपरिधेः विस्तारयितुम् 5) भाषा भाषामाध्यमेन, ज्ञानम् क्रियान्वयनेन इत्यनया संकल्पनया कौशलेन निष्ठया च कार्यं साधयेत्।( या कापि भाषा कयाचिदपि भाषया पाठयितुं शक्यते भाषायाः विषये सारहीनां चर्चाम् अकृत्वा तस्याः भाषायाः प्रयोगेण लभ्यमानस्य ज्ञानस्य विषये चर्चां कुर्यात्) 6)कक्षासु,प्रयोगशालासु,क्रीडाङ्गणेषु,उपकक्षासु,अध्यापकविश्रामकक्षासु,आन्तरिकोपवेशनेषु, च संस्कृतेनैव व्यवहारं कृत्वा संस्कृतभाषां जीवितां समृद्धां च कुर्यात् इति।

1. श्री एन.गोपालस्वामी
2. प्रो.वेम्पटि कटुम्बशास्त्री
3. डॉ.रामदोरई,
4. डॉ. बिबेक देबरायः
5. श्री वी.वी.भट्टः
6. डॉ.एच.आर.नागेन्द्रः
7. प्रो.वेदप्रकाशः
8. डॉ.अनिल सहस्रबुद्धे,
9. प्रो.परमेश्वरनारायणशास्त्री
10. श्री चमू कृष्णशास्त्री
11. प्रो.रा.देवनाथः
12. प्रो.श्रीनिवासवरखेडी
13. प्रो.रमेशभरद्वाजः